समस्तसम्बुद्धगुणाग्र[7]भूतया ।
न जायते सिद्धिरतो मुमुक्षवः
चरन्तु चर्यामतुलामिमां बुधाः ॥ ५ ॥
मु[8]रारिशक्र[9]त्रिपुरारिवित्तद[10]-
ब्रह्मादिकाभ्यर्चितपादपङ्कजाम् ।
इमां चरित्वा त्वघनाशिनीं द्रुतं[11]
परामवाप्ताः पदवीं तथागताः ॥ ६ ॥

---

[1] A तच्छं ।
[2] ECBD ०न्यपरि० ।
[3] ECDN ०ज्ज्व० ।
[4] EC ग० ।
[5] ABCDE ०वो० ।
[6] BCE ०मङ्ग० ।
[7] ABCE ०ङ्ग० ।
[8] CE सु० ।
[9] CE ०त्र० ।
[10] ABCE त्वघद (द?) ।
[11] CE ०घ्ननिघ्न० ।

सङ्गीतचर्या[1] गदितेयमेव
श्रीवज्रसत्त्वेन जगद्धितेन।
अन्या वि[2]चित्रा तु समस्तनाना-
विनेयलोकस्य वशेन यातु[3] ॥ ७ ॥
सिद्धिः प्रसिध्यत्यखिला यथोक्ता
विचित्रचर्याभिरनुत्तरा तु।
समन्तभद्रातुलसिद्धिरार्या
सैवेति[4] वज्री भगवान् जगाद ॥ ८ ॥
प्रणम्य सर्वथा[5] नाथं श्रीमदाचार्यवज्रिणम्।
आश्रयेद् गुह्यचर्यां तु कृतकृत्यो महामतिः ॥ ९ ॥
ततः स्वच्छन्दमाभूय सर्वासङ्गबहिर्मुखः।
विचरेत् तत्त्वयुक्तात्मा केसरीव समन्ततः ॥ १० ॥
यथाभूतार्थसम्वेत्ता जगदुद्धरणाशयः।
सम्यग्दृष्टिप्रवृत्तात्मा [6]दृढचित्तो निराश्रयः ॥ ११ ॥
स्वप्नमायोपमं सर्वं[7] स्कन्धधात्वादिलक्षणम्।
त्रैधातुकमिदं तद्वत्[8] ज्ञात्वेत्थं च[9] समासतः ॥ १२ ॥
कौकृत्यस्थानसिद्धं तु जीवितैश्वर्यसङ्गमम्[10]।
तथाष्टलोकधर्मं च सर्वं त्यक्त्वातिदूरतः ॥ १३ ॥
अप्रकम्प्यः[11] सदा भूत्वा निर्द्वन्द्वः कृतनिश्चयः[12]।
षट्पारमितायोगेन बुद्धसिद्धिप्रसिद्धये ॥ १४ ॥

---

[1] EC ०मुद्र०।
[2] ABCE च।
[3] DN सैतु, A सा तु।
[4] E सैव तु, ABDN नैवेति।
[5] EC ०तथा।
[6] A परमानन्दसुन्दरः।
[7] EC चित्त।
[8] ABCE सर्व।
[9] EC इत्थं ज्ञात्वा।
[10] ADN ०र्यमेव च।
[11] EC ०ल्प।
[12] BCE ०संचयः।

सत्त्वार्थे[1]ऽतिशयासक्तो न सत्त्वपरिकल्प[2]कः ।
बोधावारोप्य चित्तं तु तत्त्वचर्यां समाश्रयेत् ॥ १५ ॥

प्रज्ञोपायसु[3]युक्तात्मा सर्वासङ्गपरा[4]ङ्मुखः ।
जन्मनैवेहैव सिध्येत तत्त्वाभ्यासकृतश्रमः ॥ १६ ॥

चित्तानुकूलयोगेन[5] स्वाधिष्ठानप्रदीपितः ।
आचरेत् समयं कृत्स्नं मन्त्र[6]मार्गप्रकाशितम् ॥ १७ ॥

विघ्नमारादिशान्त्यर्थं पञ्चामृतमधिश्रयेत् ।
एषा त्वनुत्तरा रक्षा विषसू[7]चादिव्यवस्थिता ॥ १८ ॥

ज्वरा गरा विषा रोगा[8] डाकिन्युपद्रवा ग्रहाः ।
मारा विनायकाश्चैव प्रशमं यान्त्यनेन हि ॥ १९ ॥

नरोद्भवं तथाऽश्वं च औद्रं[9] मातङ्गसम्भवम् ।
प्रदीपं भक्षयेत् प्राज्ञः श्वानमेव तु पञ्चमम् ॥ २० ॥

अन्यैश्च समयैर्दिव्यै[10]श्चित्तस्योत्कर्षकारकैः ।
मरुतं[11]क्षोभशान्त्यर्थं प्रीणयेत् चित्तवज्रिणम् ॥ २१ ॥

प्रज्ञापारमिता सेव्या सर्वथा मुक्तिकाङ्क्षिभिः ।
परमार्थे स्थिता शुद्धा संवृत्या तनु[12]धारिणी ॥ २२ ॥

ललनारूपमास्थाय सर्वत्रैव व्यवस्थिता ।
अतोऽयं वज्रनाथेन प्रोक्ता बाह्यार्थसम्भवा ॥ २३ ॥

---

[1] A ॰था॰ ।
[2] DNB ॰ल्पि॰ ।
[3] ACE ॰म॰ ।
[4] BCE ॰बहि॰ ।
[5] BCDEN यथा चित्तानुकूलेन ।
[6] B ॰समनु॰ ।
[7] BDN ॰प्र॰ ।
[8] A ज्वरारोगविषयोग॰, DNB ज्वरारोगविषारोगा ।
[9] BCE उष्ट्र॰ ।
[10] A श्चास्ते॰ ।
[11] EC मारुत॰ ।
[12] A रूप॰ ।

ब्राह्मणादिकुलोत्पन्नां मुद्रां वै अन्त्यजोद्भवाम् ।
दुःशीलां परमागां[2] च विकृतां विकलां तथा ॥ २४ ॥
जनयित्रीं स्वसारं च स्वपुत्रीं भागिनेयिकाम् ।
कामयन् तत्त्वयोगेन लघु सिध्येत साधकः ॥ २५ ॥
वंशादिसम्भवैः श्रव्यै[3]श्चित्तस्योत्कर्षकारकैः[4] ।
करणैर्वाद्यमुद्राभिर्नानारसविचेष्टितैः ॥ २६ ॥
स्वाधिदैवतयोगेन पञ्चकामगुणैर्वरैः ।
रूपाद्यैं चित्तरत्नस्य आत्मानं पूजयेत् सदा ॥ २७ ॥
प्रदीपाम्बुजवज्राम्बु[5]क्षीरपूजादिविस्तरैः ।
स्रक्चन्दनसुवस्त्राद्यैश्चित्तस्यानन्द[6]कारकैः ॥ २८ ॥
गम्यागम्यादिसङ्कल्पं नात्र कुर्यात् कदाचन ।
मायोपमादियोगेन भोक्तव्यं सर्वमेव हि ॥ २९ ॥
धर्मधातुसमुद्भूता न केचित् परिपन्थिनः ।
प्रभुञ्जीत यथाकामं निर्विशङ्केन चेतसा ॥ ३० ॥
सम्भोगार्थमिदं सर्वं त्रैधातुकमशेषतः ।
निर्मितं[7] वज्रनाथेन[8] साधकानां हिताय च ॥ ३१ ॥
अनन्तज्ञानसम्प्राप्ता वन्ध्या नैव[9] तथागताः ।
सततं भावनाशक्त्या निष्पन्नादिषु का कथा ॥ ३२ ॥
सर्वभावस्वभावोऽयं बोधिचित्तस्वरूपतः ।
स एव भगवान् वज्री तस्मादात्मैव[10] देवता ॥ ३३ ॥

---

1 A ग्रू० ।
2 ABCE ०भार्या ।
3 BCE शब्दै० ।
4 CE ०स्याविकल्पकारैः ।
5 A ०गन्धमाल्यादिसत्कारैः ।
6 BCDNE ०लीन० ।
7 DN ०मित्त ।
8 BCDEN ०सत्त्वेन ।
9 BCE वन्दनैव, DN वन्दयेन्न ।
10 BCE स्वयमात्मैव ।

मण्डलेनोपवासेन मुद्रया चैत्यकर्मणा ।
आहुत्या मन्त्रजापेन पुस्तकाघोपणेन च ॥ ३४ ॥
श्रीमता वज्रनाथेन येऽपि चान्ये निदर्शिताः ।
अधिमुक्तिवशाः[2] केचित् तैश्च किं तत्त्ववेदिनः[3] ॥ ३५ ॥
अमृता[र्थी][4] यथा त[5]क्रं सारमादाय सन्त्यजेत् ।
एवं धर्मामृतं प्राप्य त्यजेन्निःशेषकल्पनाम् ॥ ३६ ॥
निर्विकल्पो यदा[6] धीमान् त्यक्तासङ्गो[7] निरास्पदः ।
तदा सिध्येन्न[8] सन्देहश्चित्तं वज्रवचो यथा ॥ ३७ ॥
मुद्रालिङ्गनसंयोगाद् वज्रावेशप्रवर्त्तनात्[9] ।
सक्षीराधरपानाच्च तत्कण्ठध्वनिदीपनात् ॥ ३८ ॥
विपुलानन्दसम्भोगात् तद्दूर[10]स्फोटनाद् ध्रुवम् ।
न चिरान्मन्मथो राजा वज्रसत्त्वः प्रसिध्यति ॥ ३९ ॥
तथा तथा प्रवर्त्तेत यथा न क्षुभ्यते मनः ।
संक्षुब्धे चित्तरत्ने तु सिद्धिर्नैव कदाचन ॥ ४० ॥
तस्मात् सिद्धिं परामिच्छन् साधको विगताग्रहः[11] ।
चित्तानुकूलयोगेन साधयेत् परमं पदम् ॥ ४१ ॥
गोमयाधारयोगेन सूत्रं[12] सन्धा[13]र्यते यथा ।
चित्तसूत्रं तथा धार्यं व ५२

---

[1] A ॰सत्त्वे॰ ।
[3] A ॰वादिना ।
[5] AE च॰ ।
[7] BCE ॰क्षयङ्गो ।
[9] B पुनस्तथा, EC ॰प्र
[11] DN गतौग्रहा, E ग॰
[13] DN चेय धा॰ ।

येन तेन प्रयोगेन[1] यत्र तत्र व्यवस्थितः।
कालसङ्ख्यां परित्यज्य तत्त्ववेदी प्रसिध्यति ॥ ४३ ॥

प्रतिदिनमद्वयमसमं योऽनि[2]शमनु[3]सेवते चि[4]तत्त्वाग्रम्।
वज्रोपममसमलमसौ[5] कायं छायासमं लभते ॥ ४४ ॥

आम्नष्येत्थं सु[6]धीमान् प्रकृतिसुविपु[7]लान् प्रज्ञया सर्वधर्मान्
च्छेत्तुं[8] त्रैलोक्यदुःखं प्रतिदिनसुमहद्वीर्यसन्नाहन[9]द्धः।
ध्यायेत् श्रीवज्रसत्त्वं सकलगुणनिधिं सर्वभावस्वभावः
चित्तं चारोप्य बोधौ विषयसुखरतः सिध्यतीहैव
धाम्नि[10] ॥ ४५ ॥

अनास्पदाः कल्पनया विमुक्ताः
स्वभावतः शुद्धतमाः समस्ताः[11]।
अनात्मसंज्ञाविषयाः प्रक[12]त्या
स्वप्नेन्द्रजालप्रतिभासतुल्याः ॥ ४६ ॥

यदाव[13]बुद्धा निरवग्रहेण
चित्तेन सद्भिर्विपुलाशयैस्तु।
तदाभिभूताः सहजावगत्या
न वा[14]धनाजालमलीभवन्ति ॥ ४७ ॥

---

[1] A ०कारेण।
[2] EC चन्ति।
[3] EC समुप०।
[4] A च।
[5] A ०मन।
[6] ECB ०त् को हि।
[7] DN ०म०।
[8] ACE चेत्तुं।
[9] EC ०बु०, A ०अ० B बुधः।
[10] EC अन्मनि।
[11] EC न्ताः।
[12] D ०क्ष०।
[13] A यथा हि।
[14] A वो०।

लाभालाभे च येषा[1]मयशसि यशसि[2] स्फारिदुःखे सुखे च[3]
निन्दायां संस्तुतौ च[4] क्षतसकलमलं तुल्यमेव स्वचेतः ।
मुक्तैः सर्वैर्विकल्पैर्जगति सकरुणं चर्यया[5]ने च सक्तं
युक्तं तेषां करस्थं सुगतपदमिति प्रोक्त[6]वान् वज्रसत्त्वः ॥ ४८ ॥

दुर्जनकुटिलोत्कटकोटरनिर्यातदुर्वचोभुजङ्गम् ।
को न बिभेति परा[7]हितकारितमतिघोरकर्माण[8]म् ॥ ४९ ॥

मनोहरं भूरिसुभाषितामृतं
असज्जनानां मनसे न रोचते ।
सुनिर्मलानन्दिगभस्तिमालिकाः
सरोरुहं नोत्सहते हिमार्चिषः ॥ ५० ॥

तदेव सन्तः सुजनस्य मानसं
रसार्द्रभसान्वितमीक्षणं च ।
करोति चन्द्रांशुवितानसङ्गमात्
क्षरत्यतीवामृतमिन्दुकान्तिः ॥ ५१ ॥

अतोऽहमार्याः कृतसम्पुटाञ्जलिः
विचक्षणाः सज्जनधर्म[मा]स्थिताः ।
समर्पयामि प्रवरं भवत्स्विदं[9]
समासतो यद् रचितं[10] मया स्फुटम् ॥ ५२ ॥

---

[1] DN यया ।
[2] EC omit.
[3] DN ०न ।
[4] A वा ।
[5] BCE प्राप्त० ।
[6] ABCDE ०र० ।
[7] ECB ०मंशा० ।
[8] MSS ०ता० ।
[9] EC भववत्स्विद ; DN ०च्छिदं ।
[10] EC दुरितं ।

श्रीवज्रसत्त्वेन यथोक्तमेव[1]
तथैव निर्दिष्टमिदं मयाऽपि ।
अथास्ति वैगुण्यमुदाहृतस्य
क्षन्तव्यमार्यैस्तदपीति याचे ॥ ५३ ॥

गुरुचरणाम्बुजसेवाविरचित[2]ममृतं शुभाकराख्येन ।
यन्मे तदखिलजगतां विहितं[3] साधनं[4] कृपया ॥ ५४ ॥

श्रीमत्त्रैलोक्यराज्ञः प्रवर[5]गुणनिधेर्देवदैत्येन्द्रमौलेः
कृत्वा तत्त्वानुविद्धं द्रुततरफलदं साधनं[6] यन्मयाऽत्र ।
प्राप्तं पुण्यं विशालं विमलगुणनिधे[7]र्हेतुभूतं सुयुक्तं
जित्वा कल्यारिचक्रं भवतु जगदिदं बोधिचित्तेन[8] तेन॥
५५ ॥

इति प्रज्ञोपायविनिश्चयसिद्धौ तत्त्वचर्यानिर्देशो
नाम पञ्चमः परिच्छेदः ।

कृतिरियमनङ्गवज्रपादानाम्[9] ।

॥ समाप्तोऽयं ग्रन्थः ॥

---

[1] BCDEN यथोदित च ।
[2] C ०यदमय०(?) ।
[3] B विहिता जगता ।
[4] AEC साधारणा ।
[5] EC ०ल० ।
[6] DN ०क ।
[7] A ०धिया ।
[8] BCDE ०चित्तम्तु ।
[9] DN omit the colophon.

II

JÑĀNASIDDHI

OF

INDRABHŪTI.

२

श्रीमदिन्द्रभूतिविरचिता

ज्ञानसिद्धिः ।

श्रीमदिन्द्रभूतिविरचिता

ज्ञानसिद्धिः ।

प्रथमः परिच्छेदः ।

नमो वज्रसत्त्वाय ।

प्रणिपत्य जगन्नाथं स[1]र्वजिनवरार्चितम् ।
सर्वबुद्धमयं सिद्धिव्यापिनं गगनोपमम् ॥ १ ॥
सर्वदं सर्वसत्त्वेभ्यः सर्वज्ञं वरवज्रिणम् ।
भक्त्याऽहं सर्वभावेन वक्ष्ये तत्साधनं परम् ॥ २ ॥
अशेषयोगतन्त्रोक्तं वज्रयान[2]मनुत्तरम् ।
ये न जानन्ति मूढास्ते भ्रमन्तीह भवार्णवे ॥ ३ ॥
ये तु सत्त्वाः समारूढाः सर्वसङ्कल्पवर्जिताः ।
ते स्पृशन्ति परां बोधिं जन्मनीहैव साधकाः ॥ ४ ॥
मुद्रामण्डलमन्त्राद्यैर्जापभावनतत्परैः ।
नैव सिद्धिं परां यान्ति कल्पासङ्ख्येयकोटिभिः ॥ ५ ॥
रूपयौवनसम्पत्ते[3]र्भोगैश्वर्यबलस्य च ।
जन्मगोत्रप्रवृत्तस्य न चित्ते मानमुद्वहेत् ॥ ६ ॥

---

[1] N सा° ।
[2] B °योग° ।
[3] MSS °साम्पत्य° ।

मतिमान् पण्डितोऽस्मीति सर्वशिल्पकलासु च ।
कुशलः पार्थिवश्चाहमिति चित्ते न योजयेत् ॥ ७ ॥
शीलवान् श्रुतवान् वीरो [रूपा][1]द्यैरपि संयुतः ।
[स्वमुक्तेः][2] परमुक्तेश्च नात्मानमुपलभ्यते ॥ ८ ॥
सर्वसत्त्वमनोव्यापी वज्रसत्त्वः स्वयं स्थितः ।
इति सञ्चिन्त्य योगात्मा न कञ्चिदवकल्पयेत् ॥ ९ ॥
बाला मूर्खा दरिद्राश्च दुःशीला रोगपीडिताः ।
एवमाद्यैरनेकैश्च संयुक्तान् नावमानयेत् ॥ १० ॥
भक्तो रत्नत्रये श्राद्धो बोधिचित्तविभूषितः ।
सर्वसत्त्वानुकम्पी च समयी संवरे स्थितः ॥ ११ ॥
शुष्क[3]लोहितमांसं च बोधिचित्त[4]विमिश्रितम् ।
महोदकसमायुक्तं भक्षयेत् तत्त्ववित् सदा ॥ १२ ॥
नरस्व[5]हयगोदीपं करिणां गर्दभस्य च ।
भक्षयेत् तत्त्वसिद्ध्यर्थं सर्वसङ्कल्पवर्जितम् ॥ १३ ॥
घातयेत् त्रिभवो[त्पत्तिं][6] परवित्ता[7]नि हारयेत् ।
कामयेत् परदारान्वै मृषावादमुदीरयेत् ॥ १४ ॥
कर्मणा येन वै सत्त्वाः कल्पकोटिशतान्यपि ।
पच्यन्ते नरके घोरे तेन योगी विमुच्यते ॥ १५ ॥
महोपायसमायुक्तो योगी लोकार्थकारकः ।
[नाकार्य][8] विद्यते तस्य सर्वसत्त्वजुगुप्सितम् ॥ १६ ॥

---

[1] MSS शोना० ? ।
[2] MSS उक्तरन् ।
[3] H मध्वा० ।
[4] N ०त्ते ।
[5] H ०श्व, B ०स्व ।
[6] MSS omit.
[7] MSS ०त्याप० ।
[8] MSS नाकारक ।

प्रज्ञोपायसमायोगात् नास्ति पापं प्रकीर्त्तितम् ।
इत्युवाच स्वयं वज्री वज्रसत्त्वविकुर्वितः ॥ १७ ॥
भक्ष्याभक्ष्यविनिर्मुक्तः पेयापेय[1] विवर्जितः ।
गम्यागम्यविनिर्मुक्तो भवेद् योगी समाहितः ॥ १८ ॥
प्रतीत्योत्पन्नसद्भावान् सर्वभावान् विचारयेत् ।
गतागतिविनिर्मुक्तो[ऽनुपपन्नान्][2] निरात्मकान् ॥ १९ ॥
मायोपमादिदृष्टान्तैर्योज्यते प्रतिजानता ।
अहं मम विकल्पं च न कुर्याद् योगतत्त्ववित् ॥ २० ॥
सर्वव्यापी महावज्रः सर्वाकाशप्रतिष्ठितः ।
सर्वसत्त्वमनोव्यापी सर्वपुण्यमहोदयः ॥ २१ ॥
अन्योन्यव्यापको वज्रः सर्ववित् लोकनायकः ।
एष वज्रधरो राजा सर्वमन्त्रेषु वर्णितः ॥ २२ ॥
गुरुप्रसादो यस्यास्ति [3]स लभेत् तत्त्वमुत्तमम् ।
अन्यथा क्लिश्यते बालः चिरकालविमोहितः ॥ २३ ॥
गुरुर्बु[4]द्धो भवेद् धर्मः सङ्घश्चापि स एव हि ।
प्रसादाद् ज्ञायते तस्य यस्य रत्नत्रयं वरम् ॥ २४ ॥
अज्ञानतिमिरान्धानामेष मार्गप्रदर्शकः ।
स भवेत् सर्वसौख्याग्र्यः सर्वकामप्रदायकः ॥ २५ ॥
धर्मगम्भीरनिष्ठात्मा विविक्तकरुणात्मकः ।
रत्नत्रयप्रतिष्ठार्थी[5] धर्मदाने निरामिषः ॥ २६ ॥

[1] HB पापापाप० ।
[2] MSS नानुत्पन्नान् ।
[3] B लभते ।
[4] MSS ०बु० ।
[5] MSS ०र्था ।

मतिमान् पण्डितोऽस्मीति सर्वशिल्पकलासु च ।
कुशलः पार्थिवश्चाहमिति चित्ते न योजयेत् ॥ ७ ॥
शीलवान् श्रुतवान् वीरो [रूपा][1]द्यैरपि संयुतः ।
[स्वमुक्तेः][2] परमुक्तेश्च नात्मानमुपलभ्यते ॥ ८ ॥
सर्वसत्त्वमनोव्यापी वज्रसत्त्वः स्वयं स्थितः ।
इति सञ्चिन्त्य योगात्मा न कञ्चिदवकल्पयेत् ॥ ९ ॥
बाला मूर्खा दरिद्राश्च दुःशीला रोगपीडिताः ।
एवमाद्यैरनेकैश्च संयुक्तान् नावमानयेत् ॥ १० ॥
भक्तो रत्नत्रये श्राद्धो बोधिचित्तविभूषितः ।
सर्वसत्त्वानुकम्पी च समयी संवरे स्थितः ॥ ११ ॥
शुष्क[3]लोहितमांसं च बोधिचित्त[4]विमिश्रितम् ।
महोदकसमायुक्तं भक्षयेत् तत्त्ववित् सदा ॥ १२ ॥
नरस्य[5] हयगोदीपं करिणां गर्दभस्य च ।
भक्षयेत् तत्त्वसिद्ध्यर्थं सर्वसङ्कल्पवर्जितम् ॥ १३ ॥
घातयेत् त्रिभवो[त्पत्तिं][6] परवित्ता[7]नि हारयेत् ।
कामयेत् परदारान्वै मृषावादमुदीरयेत् ॥ १४ ॥
कर्मणा येन वै सत्त्वाः कल्पकोटिशतान्यपि ।
पच्यन्ते नरके घोरे तेन योगी विमुच्यते ॥ १५ ॥
महोपायसमायुक्तो योगी लोकार्थकारकः ।
[नाकार्यं][8] विद्यते तस्य सर्वसत्त्वजुगुप्सितम् ॥ १६ ॥

---

[1] MSS रौना० ? ।
[2] MSS उक्तरन् ।
[3] H सप्क० ।
[4] N ०त्ते ।
[5] H ०स्य, B ०स्व ।
[6] MSS omit.
[7] MSS ०न्यप० ।
[8] MSS नाकारक ।

प्रज्ञोपायसमायोगात् नास्ति पापं प्रकीर्त्तितम् ।
इत्युवाच स्वयं वज्री वज्रसत्त्वविकुर्वितः ॥ १७ ॥
भक्ष्याभक्ष्यविनिर्मुक्तः पेयापेयविवर्जितः ।
गम्यागम्यविनिर्मुक्तो भवेद् योगी समाहितः ॥ १८ ॥
प्रतीत्योत्पन्नसद्भावान् सर्वभावान् विचारयेत् ।
गतागतिविनिर्मुक्तो[ऽनुपपन्नान्][2] निरात्मकान् ॥ १९ ॥
मायोपमादिदृष्टान्तैर्योज्यते प्रतिजानता ।
अहं मम विकल्पं च न कुर्याद् योगतत्त्ववित् ॥ २० ॥
सर्वव्यापी महावज्रः सर्वाकाशप्रतिष्ठितः ।
सर्वसत्त्वमनोव्यापी सर्वपुण्यमहोदयः ॥ २१ ॥
अन्योन्यव्यापको वज्रः सर्ववित् लोकनायकः ।
एष वज्रधरो राजा सर्वमन्त्रेषु वर्णितः ॥ २२ ॥
गुरुप्रसादो यस्यास्ति [3]स लभेत् तत्त्वमुत्तमम् ।
अन्यथा क्लिश्यते बालः चिरकालविमोहितः ॥ २३ ॥
गुरुर्बु[4]द्धो भवेद् धर्मः सङ्घश्चापि स एव हि ।
प्रसादाद् ज्ञायते तस्य यस्य रत्नत्रयं वरम् ॥ २४ ॥
अज्ञानतिमिरान्धानामेष मार्गप्रदर्शकः ।
स भवेत् सर्वसौख्याग्र्यः सर्वकामप्रदायकः ॥ २५ ॥
धर्मगम्भीरनिष्ठात्मा विविक्तकरुणात्मकः ।
रत्नत्रयप्रतिष्ठार्थो[5] धर्मदाने निरामिषः ॥ २६ ॥

---

[1] HB पापापाप० ।
[2] MSS नानुत्पन्नान् ।
[3] B लभते ।
[4] MSS ०बु० ।
[5] MSS ०र्थी ।

स गुरुः शिष्यसञ्ज्ञा[1] हि सर्वबुद्धानुकारकः ।
इत्युवाच जगन्नाथो नान्ये वै गुरवः स्मृताः ॥ २७ ॥
यस्मान्न तत्समो ह्यस्ति पूजनीयो महामुनिः ।
तस्मात् सर्वप्रयत्नेन पूजयेद् गुरुवरं व्रती ॥ २८ ॥
तत्समो विद्यते लोके मान्यो[2] न त्रिभवे जनः ।
वज्रसत्त्वः स्वयं लोके सर्वसम्पत्तये स्थितः ॥ २९ ॥
आराध्योऽनेकधा शिष्यैः[3] सत्सम्पदमभी[4]प्सुभिः ।
अक्षीण[5]पुण्यकामैश्च सर्वविघ्नविनायकैः ॥ ३० ॥
सर्वेषां समयानां हि समयोऽयं निरुत्तरः ।
रक्ष्योऽयं भवता[6] नित्यं सर्वस[म्पत्प्र][7]दायकः ॥ ३१ ॥
लब्ध्वा ज्ञानवरं दिव्यं सर्वसङ्कल्पवर्जितम् ।
वज्रज्ञानाभिषिक्तो हि[8] साधयेद् बोधिमुत्तमाम् ॥ ३२ ॥
सम्यग् ज्ञान[9]समायुक्तो[10] लेख्यमण्डलमण्डले[11] ।
गृह्णीयादभिषेकं चेत् समयाद् भ्रश्यते ह्यसौ ॥ ३३ ॥
समयभ्रं[शती][12] दुःखं कायिकं मानसं तथा ।
अर्थनाशो[13] भवेत् तस्य मरणं शीघ्रमेव च ॥ ३४ ॥
मृते च नारकं दुःखं कल्पकोटिशतान्यपि ।
अनुभूय य[14]दोत्तिष्ठेत् चाण्डाले हीनजे कुले ॥ ३५ ॥

---

[1] MSS °मज्ञा° ।
[2] H मत्यो°, B नान्यो° ।
[3] MSS °ष्य ।
[4] HB मतसम्पदभि° ।
[5] BH °त्तिन्न, N °क्षीन्न ।
[6] MSS रक्षेयं नवता ।
[7] MSS °मम्म° ।
[8] AN omit.
[9] HN °ने ।
[10] NH °क्ति B क्ते ।
[11] MSS लेख्य मिथ्या न मण्डल ।
[12] MSS °शाद् भवेद् ।
[13] MSS °श ।
[14] B °रूपम° ।

उत्पद्यते स मूढात्मा मूको वा विकलो[1]ऽथवा ।
जात्यन्धो हि भवेद् जातौ जातौ जातौ न संशयः ॥ ३६ ॥
सर्वताथागतं ज्ञानं वज्रयानमिति स्मृतम् ।
तेनाभिषिक्तो मतिमान् अभिषिक्तोऽभिधीयते ॥ ३७ ॥
स योगी सर्वबुद्धात्मा सर्वदेवान्तिके गणैः ।
कृताञ्जलिपुटैर्भू[2]त्वा अभिवन्द्यो[3] जगत्पतिः ॥ ३८ ॥
[कुर्वन्ति रक्षणं][4] वीरा बोधिसत्त्वा महाबलाः ।
बुद्धाश्चापि महात्मानो वज्रकायाः सदा स्थिताः ॥ ३९ ॥
मत्य[5]धर्मपरो ह्येष बुद्धवर्त्म[6]प्रवर्त्तकः ।
सगौरवाः प्रशंसन्ति अधिष्ठानसमन्विताः ॥ ४० ॥
लोकपालास्तथा चान्ये महाबलपराक्रमाः ।
सर्वस्थानगतस्यापि रक्षमाणाः प्रतिष्ठिताः ॥ ४१ ॥
ये चापि सर्वलोकेषु मारविघ्नाः प्रतिष्ठिताः ।
तेऽपि तस्य न कुर्वन्ति विघ्नं[7] भीताः प्रयान्ति च ॥ ४२ ॥
सर्वदेवादयः सिद्धाः सर्वाकाशचराचराः ।
न लङ्घयन्ति च तं तेऽप्यपायगतिभीरवः ॥ ४३ ॥
वीर्यस्य[8] ज्ञानविज्ञानसिद्धेर्हा[9]निर्भवत्यपि ।
यदि मोहवशादेव लङ्घयन्ति विमोहिताः ॥ ४४ ॥
सर्वज्ञो वरदो वादी वर्णसंस्थानकं विना ।
गतागतिविनिर्मुक्तो अचाल्यः सर्ववायुभिः ॥ ४५ ॥

---

[1] MSS बलको० ।
[2] MSS ०टो भू० ।
[3] B अविवन्धा ।
[4] MSS omit.
[5] B रूप० ।
[6] HN ०धर्म० ।
[7] MSS ०घ्न० ।
[8] MSS ०र्य च ।
[9] MSS ०द्धिहा० ।

दह्यते नाग्निस्कन्धेन प्लाव्यते न जलेन च ।
भिद्यते नहि शस्त्रेण तीक्ष्णेनापि प्रयत्नतः ॥ ४६ ॥
अप्रतिष्ठं यथाकाशं व्यापि लक्षणवर्जितम् ।
इदं तत् परमं तत्त्वं वज्रज्ञानमनुत्तरम् ॥ ४७ ॥
ख्याता समन्तभद्रेति महामुद्रा च संज्ञिता ।
धर्मकायमिदं ज्ञेयमादर्श[1]ज्ञानमित्यपि ॥ ४८ ॥
प्रतिबिम्बं यथादर्शे स्वकीयं दृश्यते ध्रुवम् ।
धर्मकायस्तथा ज्ञाने दृश्येतादर्शसंस्थिते ॥ ४९ ॥
सर्वतायागतं ज्ञानमात्मनः[2] प्राणिनामपि ।
एक[3]स्वभावसम्बोधौ समताज्ञानमुच्यते ॥ ५० ॥
आदिशुद्धमनुत्पन्नं प्रकृत्यै[4]व प्रभास्वरम् ।
अन्योन्यव्यापकज्ञानात् प्रत्यवेक्षणकं स्मृतम् ॥ ५१ ॥
सर्वत्र सर्वदा सर्वं बुद्धकृत्यप्रवर्त्तनम् ।
सर्वबुद्धैककार्यत्वात् कृत्यानुष्ठानमुच्यते ॥ ५२ ॥
क्लेशज्ञेयावृतं सर्वं यदा मुक्तं भवेत् तदा ।
सुविशुद्धमिति ख्यातं वज्रिणां वरयोगिनाम् ॥ ५३ ॥
त[5]था वैनेयधर्मेषु सर्वकामग[6]णेषु च ।
सर्वबुद्धैकसम्भोगात् कायः साम्भोगिको मतः ॥ ५४ ॥
सर्वलक्षणसंयुक्तो नानाकायो ह्यलक्षणः ।
निर्मितत्वात् च बुद्धानां कायो नैर्माणि[7]को मतः ॥ ५५ ॥

---

[1] H °र्शन° ।
[2] NB °त्माय ।
[3] MSS °क ।
[4] MSS °लैव ।
N य° ।
[6] MSS °ग° ।
[7] B °गा° ।

ज्ञात्वा तद्भावतो योगी महामुद्राप्रसिद्धये ।
सिध्यते जन्मनीहैव सर्वसङ्कल्प[1]वर्जितः ॥ ५६ ॥
महामुद्रेति विज्ञेया सर्वबुद्धमया शिवा ।
सिद्धा साऽनेकतन्त्रेषु देशिता वरयोगिना ॥ ५७ ॥
गर्भ[2]चक्रं मा[3]नयेत् च क्षेत्रे क्षेत्रे प्रतिक्षणम् ।
सर्वताथागतं सम्यक् तत्र सन्धारयेद् व्रती ॥ ५८ ॥
कुमारक्रीडनं सर्वं शिल्पसन्दर्शनं तथा ।
अन्तःपुरात् निष्क्रमणं मारधर्षणमेव च ॥ ५९ ॥
देवावतारणं[4] चैव धर्मचक्रप्रवर्तनम् ।
महानिर्वाणं [सन्दृश्यं य][5]च्चान्यत् सर्वक्रीडनम् ॥ ६० ॥
सर्ववज्रमयं सर्वं योगी नित्यं प्रभावयेत् ।
नापूर्वं दृश्यते ह्य[स्य][6] नायोज्यं पूर्वसंस्थितम् ॥ ६१ ॥
सर्वताथागतं सत्यं सर्ववज्रमयं शिवम् ।
त्रैकाल्यं-यत्तु[7] पर्यन्तं सर्वमेवावलोकयेत् ॥ ६२ ॥
सर्ववाग्विषयातीतं सर्वलक्षणवर्जितम् ।
ईदृशं चिन्तयेद् योगी [8][सर्वबुद्धत्वदायकम् ॥ ६३ ॥
सर्वभूमिविनिर्मुक्तं कार्यकारणवर्जितम् ।
सिद्धं विभावयन् योगी] जन्मनीहैव सिद्ध्यति ॥ ६४ ॥
सर्वोपायविधिज्ञस्य योगिनः सर्ववज्रिणः ।
सिध्यतेऽनुत्तरं तत्त्वं वज्रसत्त्ववरो यथा ॥ ६५ ॥

---

[1] BN ०कल्पवि० ।
[2] B ०र्भं ।
[3] MSS ०क्रमा० ।
[4] MSS ०णां ।
[5] MSS सन्दर्शये० ।
[6] MSS *omit.*
[7] MSS ०त् ।
[8] H omits the bracketted portion.

स्थितः सुप्तो निषण्णश्च चंक्रमेदथवापि च ।
भाषणे वज्रवाक्ये च वज्रसत्त्वत्वमावहेत् ॥ ६६ ॥
रूपशब्दरसस्पर्शाननुपभुज्य[1] सदा व्रती ।
पूजां तु सर्वबुद्धानां करोमीति समारभेत् ॥ ६७ ॥
सत्त्वेभ्योऽपि त[2]दा दद्यात् भक्तवस्त्रादिकं तथा ।
अन्यद् वापि च यत् किञ्चित् तथैव विधिमाचरेत् ॥ ६८ ॥
नृत्यगीतैस्तथा वाद्यैः पुष्पमाल्या दिभूषणैः ।
स्रग्दामचामरैः छत्रैः परात्मानं प्रपूजयेत् ॥ ६९ ॥
सुगन्धि[3]गन्धलेपाद्यैरपि लिप्तं यथाविधि ।
आत्मानं पूजयेद् योगी सर्वबुद्धमनुस्मरन् ॥ ७० ॥
व्रती वा मुण्डितो वाऽथ गृही वा सेवकोऽथ वा ।
राजा वा सेवकाध्यक्षो यथाऽसौ रोचयेद् व्रती ॥ ७१ ॥
तथासौ कुरुते योगी सर्वथा न प्रदुष्यति ।
सर्वकल्पविनिर्मुक्तो यथाकामक्रियाकरः ॥ ७२ ॥
सर्वभावस्वभावोऽसौ सर्वबुद्धमयो विभुः ।
स्वयम्भूः[4] कामचारी च सर्वसत्त्वहृदि स्थितः ॥ ७३ ॥
भावयेत् तत्त्वयोगी स सर्वतत्त्वमनुस्मरन् ।
सर्ववज्रमयं सिद्धं लघु वज्रत्वमाप्नुयात् ॥ ७४ ॥
नाच विघ्ना न माराश्च सर्वे वश्या भवन्ति च ।
सर्वदुःखविनिर्मुक्तमात्मानं साधयेद् व्रती ॥ ७५ ॥

---

[1] H ०भ्रेत्, N ०जयेत् ।
[2] MSS य० ।
[3] N ०स्ता० ।
[4] BH ०न्धा० ।
[5] H ०न्तु ।

सिध्यते सर्वबुद्धत्वं दिने विधिविवर्जितम्।
आत्मानं सर्वसंयुक्तं सदा पश्यन् महाव्रती ॥ ७६ ॥
सर्वपूजाविशेषैश्च आत्मानं पूजयेत् सदा।
अन्येभ्योऽपि तथा देयं वज्रसत्त्वमनुस्मरन् ॥ ७७ ॥
सर्वसत्त्वान्नसम्भूतान् प्राणिनो[1]ऽपि [विडु][2]द्भवान्।
संगृह्य च महायोगी भक्षयेत् तत्त्वसिद्धये ॥ ७८ ॥
महाप्रदीपसंयुक्तैः समये[3]ऽन्यैर्जुगुप्सितैः।
पञ्चामृतं सदा भक्ष्यं पूज्याश्चैव तथागताः ॥ ७९ ॥
सर्वाङ्गकुत्सितायां वा न कुर्यादवमाननाम्।
स्त्रियं सर्वकुलोत्पन्नां पूजयेद् वज्रधारिणी[4]म् ॥ ८० ॥
अज्ञातपुण्यसंयुक्तां बोधिचित्तसमन्विताम्।
[सेव][5]येत् तत्त्वसिद्ध्यर्थं निर्विकल्पविधिस्थितः ॥ ८१ ॥
चण्डालकुलसम्भूतां डोम्बिकां वा विशेषतः।
जुगुप्सितकुलोत्पन्नां सेवयन् सिद्धिमाप्नुयात् ॥ ८२ ॥
द्विजातिकुलसम्भूताः कन्याः काम्यास्तु योगिनः[6]।
यथा चित्तं न प्रदुष्येत् तथा कार्यं सुशोभनम् ॥ ८३ ॥
मन्त्रकैः छर्दि(!) सम्मिश्रैः पुरीषादिविमिश्रितैः।
पूजयेद् वज्रसत्त्वात्मा निर्विकल्पेन चेतसा ॥ ८४ ॥
यथाकामक्रियाकारी यथारु[8]चितचेष्टितः।
साधयेद् वज्रसत्त्वत्वमन्यथा क्लिश्यते ध्रुवम् ॥ ८५ ॥

1 B ०ना।
2 BH ०प्रक्ष०, N ०प्र्र०।
3 MSS ०येर०।
4 HB ०शा०।
5 MSS भक्ष०।
6 HB ना।
7 H पक्ष०।
8 H ०नु०।

व्रतोपवास[1]नियमै[2]र्देवतारूपभावनैः ।
नानाभुजसमायुक्तैः सिध्यते नहि साधनैः[3] ॥ ८६ ॥
जम्बूद्वीपरजःकल्पमन्त्रजापविभावनैः ।
सिध्यते नहि बुद्धत्वं महावीर्यवतामपि ॥ ८७ ॥
एवमाद्यैरनेकैश्च शिशुभिः कल्पितैर्नयैः ।
दुर्लभं सुगतौ जन्म वज्रसत्त्वं कथं भवेत् ॥ ८८ ॥
महा[4]मण्डलमुद्रादीन् जगाद भगवान् मुनिः ।
सम्यग्ज्ञानसमायोगभव्यताविगतात्मनाम् ॥ ८९ ॥
स्वसं[5]वेद्यस्वभावं यत् तत्त्वरत्नमनुत्तरम् ।
युक्त्यागमविचारैस्तु ग्रहीतुं ये तु न क्षमाः ॥ ९० ॥
अज्ञानमोहसंच्छन्ना अपरोक्षकबुद्धयः ।
आदिकर्मिकश्रा[द्धा]स्ते हीनधर्मस्य भाजनाः ॥ ९१ ॥
तान् प्रत्युक्ता[6] जगन्नाथैः वज्रसत्त्वविभावनैः ।
भुजवर्णसमायुक्तमुद्रामण्डलकैस्तथा ॥ ९२ ॥
अपरप्रत्युपायैर्ये गम्भीरज्ञानभाजनाः ।
अकम्प्याः पापमित्रैश्च मारविघ्नविनायकाः ॥ ९३ ॥
तेषां तत्त्वमिदं शुद्धं सर्वकल्पविवर्जितम् ।
अगम्यं सर्वसत्त्वानां ब्रह्मादीनां च सर्वथा ॥ ९४ ॥
देशितं लोकनाथैस्तु ज्ञानम[त्य]द्भुतं परम् ।
सिद्धिदं जन्मनीहैव सर्वबुद्धमयं शिवम् ॥ ९५ ॥

इति ज्ञानसिद्धौ तत्त्वनिर्देशः प्रथमः परिच्छेदः ।

---

[1] MSS ॰सो ।　[2] MSS ॰मे ।　[3] MSS नं ।　[4] B मुद्रा॰ ।
[5] HB ॰य॰ ।　[6] MSS ॰युक्तान् ।

द्वितीयः परिच्छेदः ।

पञ्चबुद्धस्वभावत्वात् पञ्चस्कन्धा जिनाः स्मृताः ।
धातवो लोचनाद्यास्तु बुद्धकायस्त[1]तो मतः ॥ १ ॥

एवं चेत् प्राणिनः सर्वे सम्बुद्धास्त्रिभवे सदा ।
बुद्धत्वाय क्रियाः सर्वा वृथैव श्रुतभावनाः ॥ २ ॥

बुद्धत्वात् सर्वलोकस्य सर्वेऽपि त्रि[2]भवेन तु ।
सुखदुःखपिपासादिबाधा तस्य न युज्यते ॥ ३ ॥

षडभिज्ञा[3]दयश्चापि बोधौ गुणविभूतयः ।
कथं ते न प्रवर्त्तन्ते बुद्धकायो भवेद् यदि ॥ ४ ॥

यस्त्वेवं न प्रजानाति स सम्बुद्धो भवेत् कथम् ।
एवं जानाति चेत् कश्चिदसौ बुद्धो भविष्यति ॥ ५ ॥

क्रमादभ्यासयोगेन यस्य चिन्ता प्रवर्त्तते ।
बुद्धो भवेदसौ योगी नान्ये बुद्धत्वसाधकाः ॥ ६ ॥

स्वभावाद् यदि ते बुद्धा नाभ्यासेन प्रयोजनम् ।
स[4]युक्तिकसदाभ्यासं युक्तितो[5]ऽयुक्तिवर्जितम् ॥ ७ ॥

यद्वनाथो जनः कश्चित् राजाऽहमिति भावयेत् ।
कल्पकोटिशतेनापि नासौ राज्यमवाप्नुयात् ॥ ८ ॥

मिथ्याकल्पनया यस्माद् राज्यं तस्य न विद्यते ।
मिथ्याभावनया तस्माद् बुद्धत्वं न भविष्यति ॥ ९ ॥

---

[1] MSS ०य त ।
[2] BH सर्वेत्मपि०
[3] BN षडभिज्ञाना० ।
[4] B स० ।
[5] N omits

तन्त्रराजेषु संबद्धैः स्कन्धाद्यायतनादिषु ।
तत्त्वं नामभिरुद्दिष्टं संयुक्तं सम[1]भाषया ॥ १० ॥
[शुक्रं][2] वैरोचनं[3] ख्यातं वज्रोदकं तथाऽपरम्[4] ।
स्त्रीन्द्रियं च यथा पद्मं वज्रं पुंसेन्द्रियं तथा ॥ ११ ॥
स्वभावाद् देवताकार्यं[5] तस्माद् वक्तुं न युज्यते ।
युक्त्यागमानुसारेण यस्माद् वक्तुं न शक्यते ॥ १२ ॥
कृतकं देवतारूपं वज्रसत्त्वो भवेद् यदि ।
संस्कृतौ जायते तस्मात् नश्यते तु घटादिवत् ॥ १३ ॥
ततो निष्फलतां यायात्[6] बोधिचर्या त्वनेकधा ।
भावनाऽपि किमर्थं स्याद् यदि भूत्वा विनश्यति ॥ १४ ॥
मनोमयकृतं रूपं कथं संस्कृतमुच्यते ।
कथं विनश्यति चैतत् शृणु मो हार्णवाधुना ॥ १५ ॥
चित्तस्य कल्पना ह्येषा सापि संस्कृतलक्षणा ।
मनसा कल्पितं यत् तदविनाशि कथं भवेत् ॥ १६ ॥
भुजवर्णसमायुक्तं यथापूर्वव्यवस्थितम् ।
अकृतं देवतारूपं भाव्यते तन्मयाऽधुना ॥ १७ ॥
अकृतं देवतारूपं भाव्यते तत् त्वया यदि[8] ।
स्थितं पूर्वमनुत्पन्नं भाव्यते किं प्रयोजनम् ॥ १८ ॥
भवेयं तादृशं रूपं मत्वा[9]हमिति भावना ।
भावने द्वे विचार्येऽत्र योगिना रूपसाधने ॥ १९ ॥

---

[1] N ममया० ।
[2] HB सक्रद०, N मक्रद० ।
[3] HB ०नो ।
[4] H omits.
[5] HB ०कार्यं ।
[6] B ०ताया या ।
[7] H म० ।
[8] Twice in N.
[9] MSS तत्त्वा० ।

ताद्दशोऽहं भवेयमिति यदि ध्यानं प्रकल्प्यते।
यदा ध्यानं स्फुटीभूतं दृश्यते देवता तु सा ॥ २० ॥
[1]पटादौ रूपमालोक्य यदा ध्यानं [प्रकल्प्यते।
तदा].................जातस्य ते बुधाः[2] (!) ॥ २१ ॥
अजातं देवतारूपं ध्याने तत्र गतं यदि।
सर्वाभिज्ञाप्रवृत्तेस्तु [त]द् रूपं चैव तत्क्षणात् ॥ २२ ॥
एवं चेत् नास्ति ते सम्यक् तद् ध्यानेनागतं भवेत्।
त्वया निष्पादितं रूपं क्षतकं किं न बुध्यसे ॥ २३ ॥
अहं तदिति पक्षे तु द्वयं तत्र न विद्यते।
सिद्धस्य साधनं नास्ति कथं ध्यानप्रकल्पना ॥ २४ ॥
सर्वज्ञत्वं हि सर्वज्ञो न भूयः प्राप्तुमिच्छति।
बुद्धकृत्यं त्वया कार्यं बुद्धत्वं नान्यकारिता ॥ २५ ॥
एवं ते नास्ति सम्यक्त्वं कथं मिथ्या प्रकल्प्यते।
अक्षतं बुद्धकृत्यं यत् तद्देवाहम्मतिर्वृथा ॥ २६ ॥
अक्षतं देवतारूपं तदिदानीं विचार्यते।
अक्षतं[3] शक्यते वक्तुं[4] रूपित्वान्न[5] घटादिवत् ॥ २७ ॥
अत एव जगन्नाथा बालानां प्रतिबोधने।
निर्वाणं दर्शयन्त्येव रूपस्यानित्यदर्शकाः ॥ २८ ॥
तस्मात् स्वरूपवान् बुद्धः[6] क्वचित् लोके प्रवर्त्तते।
बुद्धरूपप्रसिद्ध्यर्थं न कार्या रूपभावना ॥ २९ ॥

---

[1] H omits three lines
[2] Incomplete in MSS
[3] HB ०तं।
[4] HB ०तन्न।
[5] MSS च।
[6] MSS बन्धु।

कायस्थं चेद् भवेद् ज्ञानं कायाभावे न सर्ववित् ।
प्रतीत्यसम्भवं ज्ञानमतो नाशमवाप्नुयात् ॥ ४० ॥
विनाशिज्ञानकायानां सर्वज्ञत्वं न युज्यते ।
अतोऽपि बुद्धकायो हि सर्वज्ञो न विधीयते ॥ ४१ ॥
ज्ञानादन्यत्वपक्षे तु बुद्धकायः कथं भवेत् ।
बुद्धस्य प्रतिमेत्येवं वक्तुं युक्तं हि योगिना ॥ ४२ ॥
तस्मात् मूढतरो लोको यो रूपं ध्यातुमिच्छति ।
बुद्धज्ञानप्रसिद्ध्यर्थमाकाशे भोक्तुमिच्छति ॥ ४३ ॥
सत्त्वेषु करुणाहीनाः श्रद्धाप्रज्ञाविवर्जिताः ।
गम्भीरोदारधर्मेषु बुद्धिस्तेषां भवेन्नहि ॥ ४४ ॥
एतेषां धर्म[1]हीनानामितश्चेतश्च धावताम् ।
उन्मत्तवत् प्रयातेषु [यु]गपद्[2] धर्ममोहिताम् ॥ ४५ ॥
करुणा महती कार्या सत्त्वेभ्योऽपि विशिष्टता ।
नापमानमतो युक्तं सम्यग्ज्ञानोपदेशकैः ॥ ४६ ॥

ज्ञानसिद्धौ रूपभावनानिषेधो द्वितीयः परिच्छेदः ।

---

[1] HN ॰ज्ञान॰ ।

[2] MSS add त ।

चक्षुर्विज्ञान[मार्ग][1] यत् तद् ज्ञानेन विकल्प्यते ।
विकारित्वं प्रसज्येत बुद्धज्ञानस्य नान्यथा ॥ १० ॥
अविकारं तु तद् ज्ञानं सर्वबुद्धैः प्रदर्शितम् ।
तस्मान्न युज्यते वक्तुमेकत्वमिति निश्चयः ॥ ११ ॥
ज्ञानस्य प्रतिभासोऽयं न तद् ज्ञानं प्रकल्प्यते ।
प्रतिभासनिरोधेन ज्ञानं कस्मान्निरुध्यते ॥ १२ ॥
तस्मादसिद्धमेकत्वं त्वद्वाचै[2]व सुनिश्चितम् ।
एकत्वं तु किमर्थं हि परिकल्पयसे [वृथा][3] ॥ १३ ॥
युक्त्यागमवि[4]रुद्धत्वात् निष्फलत्वाच्च सर्वथा ।
ज्ञानं तदेव सा[5]कारमित्येवं नहि युज्यते ॥ १४ ॥
आकाराद् व्यतिरिक्ते तु ज्ञाने ज्ञानं न युज्यते ।
ज्ञेये सति भवेद् ज्ञानं न तु ज्ञेयें[6] तिरस्कृते[7] ॥ १५ ॥
आकारेभ्यः पृथग्भूतं ज्ञानं चेद् यदि कल्प्यते ।
आकाराश्च पृथग्भूता ज्ञानादेव निराश्रयात् ॥ १६ ॥
ज्ञानस्योत्पादकाले तु नाकारा[8]णां समुद्भवः ।
आकाराणां समुत्पादे ज्ञानं नैवोपपद्यते ॥ १७ ॥
यथा घटस्य निष्पत्तौ न पटस्योद्भवो भवेत् ।
पृथक्त्वादेव धर्माणामेवं[9] लोके प्रदृश्यते ॥ १८ ॥

---

[1] MSS ०मागम्य ।
[2] MSS ०स्वे ।
[3] H त्वया, NB तया ।
[4] MSS ०नि० ।
[5] MSS तदेव ज्ञानस्य ।
[6] BN ०य०, H adds सति ।
[7] MSS ०त ।
[8] HN ०गो० ।
[9] B ०मल ।

न ह्यजातेन पुत्रेण पुत्री[1] भवितुमर्हति ।
एवं निराश्रये[2] ज्ञाने साकारं कथमिष्यते ॥ १९ ॥
किमपेक्ष्य भवेद् ज्ञानं साकारं येन त[3]द्भवेत् ।
साकारज्ञानमित्येव आकाररहितं न तु ॥ २० ॥
आकाररहिते ज्ञाने साकारत्वं कथं भवेत् ।
आकारैः सहितं यत् तु तत् साकारं प्रकल्प्यते ॥ २१ ॥
सर्वाकारविनिर्मुक्तं बुद्धज्ञानं कथं भवेत् ॥
आकारेण विनाऽपीह साकारत्वं भवेद् यदि ।
बुद्धज्ञानं विना बुद्धः कथं तत्त्वं भविष्यति ॥ २२ ॥
न तद् ज्ञानं न सर्वज्ञः पृथग्ज्ञाने विकल्पते ।
अथ साकारता ज्ञाने सिद्धिं नैवोपपद्यते ॥ २३ ॥
आकारेण समायुक्तं साकारत्वं भवेद् यदि ।
[4]न संयोगतया दृष्टं बुद्धवत् संप्रवर्त्तके[5] ॥ २४ ॥
रूपिणो नहि संयोगा अरूपेणैव सर्वथा[7] ।
यथाकाशेन संयोगात् न [घटस्योद्भवो भवेत्][6] ॥ २५ ॥
आकारेण च युक्तं [हि] साकारत्वं भवेद् यदि ।
सापेक्षत्वाद् विनाशित्वं विपासमग्र्यं भविष्यति ॥ २६ ॥
प्रतीत्यसम्भवं यत् तद् बुद्धज्ञानं भवेन्नहि ।
संस्कृतत्वं यथा ज्ञाने साकारत्वं न सिध्यति ॥ २७ ॥

---

[1] MSS मपुत्रो ।
[2] B ०मये, HN ०श्रये ।
[3] B स० ।
[4] B repeats बुद्धज्ञान विना बुद्धः etc. instead of this line.
[5] N ०ते ।
[6] MSS घटस्योस्यते यतः ? ।
[7] B स० ।

आकारज्ञानयोश्चैव अन्यत्वं तु तयोर्यदि।
अन्योन्यकं मयोक्तं च कथं ज्ञानं भविष्यति ॥ २८ ॥
आकाराश्च पृथग्ज्ञानादित्येवं यदि कल्पते।
ज्ञानादन्यतया[1] तेषामज्ञानत्वं प्रसज्यते ॥ २९ ॥
आकारेभ्यो यथाऽन्यत्तु निराकारमतो भवेत्।
तथा[2] ज्ञानं निराकारं कथमेवं न कल्पते ॥ ३० ॥

ज्ञानसिद्धौ साकारनिराकरणस्तृतीयः परिच्छेदः।

---

[1] MSS ॰यो। [2] MSS ॰दा।

न ह्यजातेन पुत्रेण पुत्री भवितुमर्हति ।
एवं निराश्रये ज्ञाने साकारं कथमिष्यते ॥ १९ ॥
किमपेक्ष्य भवेद् ज्ञानं साकारं येन तद्भवेत् ।
साकारज्ञानमित्येव आकाररहितं न तु ॥ २० ॥
आकाररहिते ज्ञाने साकारत्वं कथं भवेत् ।
आकारैः सहितं यत् तु तत् साकारं प्रकल्पते ॥ २१ ॥
सर्वाकारविनिर्मुक्तं बुद्धज्ञानं कथं भवेत् ॥
आकारेण विनाऽपीह साकारत्वं भवेद् यदि ।
बुद्धज्ञानं विना बुद्धः कथं तत्त्वं भविष्यति ॥ २२ ॥
न तद् ज्ञानं न सर्वज्ञः पृथग्ज्ञाने विकल्पते ।
अथ साकारता ज्ञाने सिद्धिं नैवोपपद्यते ॥ २३ ॥
आकारेण समायुक्तं साकारत्वं भवेद् यदि ।
'न संयोगतया दृष्टं बुद्धवत् संप्रवर्त्तके' ॥ २४ ॥
रूपिणो नहि संयोगा अरूपेणैव सर्वथा ।

दृष्टान्तैरेव ते तुल्या धर्माश्चेत् सर्वथा स्मृताः।
भवेयुर्न च दृष्टान्ताः साध्यत्वात् सर्वयत्नतः ॥ १० ॥

पुरुषे सिंहदृष्टान्तो यथा लोके प्रवर्त्तते।
शौर्यादिगुणसंयोगात् न तु पुच्छादिसम्भवैः ॥ ११ ॥

तस्मान्न सर्वथाऽभावाः सर्वभावाः स्वभावतः।
युक्त्यागमानुसारेण बोद्धव्यं पुरुषोत्तमैः ॥ १२ ॥

तस्मात् त्वया यदुद्दिष्टं बालोल्लापनगामिना।
न तद्भूतं वदन्त्येव जगदुद्धरणोद्यमाः ॥ १३ ॥

शशशृङ्गं यथाऽभावं वन्ध्यायाः पुत्रवत् तथा।
न क्वचित् सर्वभावानामभावो देशितो जिनैः ॥ १४ ॥

यदि रूपादयो भावा विद्यन्ते नैव सर्वथा।
दिव्यचक्षुः कथं सिद्धं बुद्धानां करुणात्मनाम् ॥ १५ ॥

दिव्यश्रोत्रादयः सर्वे न भवन्ति ततस्तथा।
सर्वज्ञो हि ततो न स्यादभिज्ञानामभावतः ॥ १६ ॥

निराकारेण[1] ज्ञानेन बुद्धकाये सुसंयुते।
सर्वाभिज्ञाः प्रवर्त्तन्ते सर्ववित्त्वं कथं नहि ॥ १७ ॥

चक्षुरादिभिरेवैते रूपाद्यायतनादयः।
अनुभाव्याः सचेतस्कैरेवं लोके प्रवर्त्तते ॥ १८ ॥[2]

रूपादयो न सन्तीति त्वयैवोक्तं[3] पुनः पुनः।
अभावेन कथं योगो भवेदिति प्रकल्प्यते ॥ १९ ॥

---

[1] HB °ङ्क°। [2] MSS °र°।
[3] MSS °ये°।

यद्यभावेन योगः स्याद् युक्तं वक्तुं त्वयेदृशम् ।
अभावः सर्वथा येषां तद्योगः कथमिष्यते ॥ २० ॥
अयोगेऽपि भवेद् ज्ञानं प्रणिधानवशात् तथा ।
करोति सर्वसत्त्वार्थं यथा वैनेयभाजने ॥ २१ ॥
नासौ किञ्चिद् यदा वेत्ति सत्त्वार्थं कुरुते कथम् ।
नावेदको हि सर्वज्ञो न कृपा सत्त्वसङ्ग्रहे ॥ २२ ॥
प्रणिधानेन सत्त्वार्थः चिन्तामणिरिवापरः ।
करोतीति न तद्भक्त्या प्रतिभाति सतामिह ॥ २३ ॥
सर्वसत्त्वार्थसंसिद्धौ नियत[1]त्वं सदा यतः ।
चिन्तामणिरतः ख्यातं ज्ञानं तदज[2]डात्मकम् ॥ २४ ॥
अदृष्टेऽप्यकृतं यच[3] स्व[4]कीया ज्ञानकल्पना ।
सर्वज्ञोऽहं जगत्स्वाम्य[6]प्यभूवमिति किं नहि ॥ २५ ॥
बोधिचित्तं समुत्पाद्य सर्वसम्भारसंवृतः ।
महोत्साहो महावीर्यो भावनाचिन्तनादिभिः ॥ २६ ॥
सद्धर्मश्रवणाद्यैस्तु दुःखे नैव प्रयोजनम् ।
अपूर्वस्यादयो ना[5]स्ति स्थितपूर्वं च नश्यति ॥ २७ ॥
ईदृशं यदि बुद्धत्वं वृथा सर्वमतोऽखिलम् ।
भयेभ्यो मरणादिभ्यो मुक्तो नारकपीडनात् ॥ २८ ॥
प्रियाप्रियादिदुःखैश्च रहित[7]स्त्वजडात्मकः ।
सर्वधर्मस्वभावज्ञः सर्वज्ञो हि निरुच्यते ॥ २९ ॥

---

[1] H ०ते ।
[2] MSS तु तज्ज० ।
[3] H तत्त ।
[4] H त्व० ।
[5] B ०र्म्यै० ।
[6] HN ०याज्ञा० ।
[7] HN ०तो य० ।

स्वभावज्ञानसर्वज्ञ इति सम्बुद्धेरितः ।
सर्वं प्रत्यक्षतो वेत्ति सर्वज्ञस्तेन कथ्यते ॥ ३० ॥
[निहन्ति][1] नारकं दुःखं संसारेऽपि प्रवर्त्तकम् ।
चक्रवर्त्यादिसौख्यं च लभते नात्र संशयः ॥ ३१ ॥

ज्ञानसिद्धौ निराकारनिराकरणश्चतुर्थः परिच्छेदः ।

पञ्चमः परिच्छेदः।

एवं दोषसमूढत्वात् निराकारमतो न चेत्।
ततो निश्चिततातत्त्वमधुना प्रतिषिध्यते ॥ १ ॥

किञ्चिन्मूढतरावस्थं ज्ञानमिच्छन्ति मोहिनः।
मूढभावनया मूढं प्राप्नुवन्त्येव दुर्धियाः ॥ २ ॥

हेतुना सदृशं ज्ञानं फलं लोके तु युज्यते।
कोद्रवा नहि जायन्ते शालयः क्वचिदेव तु ॥ ३ ॥

निर्विकल्पमतो ज्ञानं नहि युक्तं विधीयते।
ज्ञानस्य निर्विकल्पत्वमन्यथा नहि युज्यते ॥ ४ ॥

ज्ञानस्य निर्विकल्पत्वं सत्यमुक्तं तथागतैः।
तत्त्वज्ञानस्य मूढस्य निर्विकल्पत्वकल्पना

निर्विकल्पनमात्रत्वं स्मरणं क्रियते यदि ।
पदान्येतानि सर्वाणि स्मर्यन्ते तु कथं नहि ॥ ९ ॥
उभयार्थविहीनत्वात् न ज्ञानं नापि सर्ववित् ।
प्रतिषिद्धमिदं तत्त्वं मिथ्याज्ञानं तु मोहिनाम् ॥ १० ॥

ज्ञानसिद्धौ मूढभावनानिषेधः पञ्चमः परिच्छेदः ।

षष्ठः परिच्छेदः ।

नाश्वासं नापि प्रश्वासं तत्त्वं भवितुमर्हति ।
तयोर्मध्ये भवन्नापि वायुस्तत्त्वं कथं भवेत् ॥ १ ॥
मध्ये न किंचिदप्यस्ति कथं तत्त्वं भविष्यति ।
वायुर्यदि भवेत्तत्त्वं भस्त्रापार्श्वे भविष्यति ॥ २ ॥
प्रेरणे भस्त्रया वायोः तथैव क्षेपणेऽपि च ।
यथा कश्चित् धमेद् भस्त्रां तद्वद्देही धमेन्मनः ॥ ३ ॥
न वायुधमकः कश्चित् न वायुध्मामकस्तथा ।
कायस्य धमकेनेव भस्त्राया धमकेन च ॥ ४ ॥
न विशेषः तयोर्दृष्टो योगिभिः तत्त्वदर्शिभिः ।
नरेण मनसा तुल्यं धमकत्वक्रियां प्रति ॥ ५ ॥
भस्त्राया वायुना तुल्यं श्वासप्रश्वासवायुना ।
भस्त्रावातं यथा तत्त्वं देहवायुस्तथा भवेत् ॥ ६ ॥
देहवायुः यदा तत्त्वं सर्वद्वारविनिर्गतम् ।
न तत्त्वं युज्यते वक्तु[मावेश]त्वात् प्रभंजनः ॥ ७ ॥
भ्रष्ट[मार्ग]मूढानां मिथ्यातत्त्वप्रभाविनाम् ।
न तेषां सुगतौ जन्म गतिरेकैव नारकी ॥ ८ ॥

ज्ञानसिद्धौ आश्वासप्रतिषेधः षष्ठः ।

सप्तमः परिच्छेदः ।

सुखं द्वीन्द्रियजं केचित् तत्त्वमाहुर्नराधमाः ।
[तत्त्वं][1] महासुखं नैव प्रवदन्ति जिनोत्तमाः ॥ १ ॥
प्रतीत्योत्पादसम्भूतं न तत्त्वं जायते क्वचित् ।
न तत्सुखं स्वभावेन विद्यते सर्वदा यतः ॥ २ ॥
सर्वतायागतं ज्ञानं स्वसंवेद्यस्वभावकम् ।
सर्वसौख्याग्रभूतत्वात् महासुखमिति स्मृतम् ॥ ३ ॥
अनित्यं महासुखं नैव सदा नित्यं महासुखम् ।
कच्छकण्डूयनोत्पन्नं कथं महासुखं नहि ॥ ४ ॥
रागतुल्यं सुखं नास्ति तज्जिनेभ्यः समाददन् ।
भुञ्जीत सर्वकामांश्च जुगुप्सां नैव कारयेत् ॥ ५ ॥
योगभद्रेषु सर्वेषु वज्रसत्त्वेन देशितम् ।
योगिनां चित्तसौख्यार्थं न तत्त्वं परमार्थतः ॥ ६ ॥

ज्ञानसिद्धौ महासुखप्रतिवर्णिकाप्रतिषेधः सप्तमः ।

---

[1] MSS तथापि ।

अष्टमः परिच्छेदः ।

[स्वसं][1]वेद्यं प्रतिपिंडं सम्यग्ज्ञानमतो नहि ।
मिथ्या तत्त्वानि सर्वाणि कल्पितानि सुमोहिनाम् ॥ १ ॥
स्वबुद्धैर्न निषेध्यानि अन्यान्यपि विचक्षणैः ।
सम्यक् तत्त्वं यथा लभ्यं तदिदानीं प्रकथ्यते ॥ २ ॥
परीतबुद्धयः सत्त्वा अल्पपुण्याल्पवीर्य्यकाः ।
कथं ते प्राप्नुयुर्ज्ञानं सर्वताथागतं परम् ॥ ३ ॥
[अ][2]नुक्रमं ब्रवीम्येष सर्वबुद्धैस्तु देशितम् ।
जानुनी संप्रतिष्ठाप्य धरण्यां सुप्रतिष्ठितः ॥ ४ ॥
वदेद्देवं ततः श्राद्धो ऋजुकायः कृताञ्जलिः ।
संबुद्धाः शासिनो लोके भविष्यन्तोऽप्यनागताः ॥ ५ ॥
वर्त्तमाना गताश्चैव सद्धर्म्मप्रतिदेशकाः ।
सर्वबुद्धानहं वन्दे एतान् तत्त्वप्रदेशकान् ॥ ६ ॥
अहं निर्य्यातयाम्येष पूजोपस्थानकर्म्मणि ।
आत्मानं सर्वबुद्धानां प्रतिगृह्णन्तु नायकाः ॥ ७ ॥
सर्वपूजाविशेषैस्तु पूज[यंश्च][3] जगद्गुरून् ।
आकाशधातुपर्य्यन्तै[रा][4]सुमेरुपरिग्रहैः ॥ ८ ॥
धर्म्मधातुसमुत्पन्नैरचिंतैर्वि[वि]धैर्वरैः ।
अतीतानागतैः सर्वैर्वज्रसत्त्वविकुर्विंतैः ॥ ९ ॥

---

[1] MSS सख ।
[2] MSS तद० ।
[3] MSS ०यन् ।
[4] MSS ०न ।

समुत्पन्नानि पापानि सर्वाण्यपि [स तत्त्व[1]]वित्।
प्रतिदेश्य समादध्यादकरसम्बरं पुनः ॥ १० ॥
यत् पुण्यं सर्वबुद्धानां तत्सुतानां च धीमताम्।
श्रावकसङ्घबुद्धानां यच्चान्यत् सर्वदेहिनाम् ॥ ११ ॥
अनुमोदे तथा पुण्यं सर्वजन्मसु यत्कृतम्।
स्वकीयं परकीयं च संहृष्टेन तु चेतसा ॥ १२ ॥
धर्मतत्त्वरथारूढा दशदिक्सर्वतः स्थिताः।
धर्मद्योतनदक्षास्तु महाकारुण्यचेतसः।
[2]प्रकाशयन्तु ते धर्मा विज्ञप्तिं तत्करोम्यहम् ॥ १३ ॥
कृताञ्जलिपुटो भूत्वाऽसौ निर्वान्तु कदा कथम्।
भवेयुः प्राणिनो बुद्धाः सर्वे यावत् प्रतिष्ठिताः ॥ १४ ॥
तावत् तिष्ठन्तु ते नाथाः सर्वसत्त्वार्थकारकाः।
कायवाङ्मनसं पुण्यं कृतं कारितमेव वा ॥ १५ ॥
यच्चानुमोदितं किंचित् तेन लोकोऽस्तु सर्ववित्।
त्रिकालं तु यथाशक्त्या पुष्पादिभिः प्रपूज्य च ॥ १६ ॥
मण्डलं सर्वबुद्धेभ्यो वज्रसत्त्वेभ्य एव च।
कृत्वा पञ्चामृतं मिश्रं अमिश्रं वा[3] प्रकल्पितम् ॥ १७ ॥
सर्वकल्पविमुक्तात्मा गृह्णीयात् समयादिकम्।
तत्त्वसंग्रहतन्त्रादौ स्थितं समयसम्बरम् ॥ १८ ॥
प्राणिनश्च [न] ते[4] घात्या अदत्तं नैव चाहरेत्।
नाचरेत् काममिथ्या वा मृषां नैव हि भाषयेत् ॥ १९ ॥

[1] MSS जगत्॰।
[2] B omits प्रकाशयन्तु...नाथाः।
[3] HB ॰त्रादा।
[4] B स्वयं तैः।

सर्वानर्थस्य मूलत्वात् मद्यपानं विवर्जयेत् ।
पैशुन्यमथ पारुष्यं सम्भिन्नालापभाषणम् ॥ २० ॥
अविद्यासत्त्वविद्वेषमिथ्यादृष्टिं च सर्वथा ।
उत्पादयाम्यपूर्वं तु स्थापयिष्यामि निर्वृतौ ॥ २१ ॥
समाध्यङ्गं ततः सर्वं गृह्णीयात् संवरं परम् ।
बोधिचित्तं तथोत्पाद्यं सर्वपुण्यमहोदयम् ॥ २२ ॥
सर्वसत्त्वं महान्तं च स्थाप्य सर्वज्ञभूमिषु ।
सर्वदुःखहरो ह्येषां भवेयं करुणात्मकः ॥ २३ ॥
सर्वसम्पत्प्रदाता च बोधिमार्गोपदेशकः ।
सम्यक् चित्तं समुत्पाद्यं समत्वं सर्वदेहिषु ॥ २४ ॥
बोधिचित्तमिदं ज्ञेयं अन्यथा वितथं भवेत् ।
बोधिचित्तं न तन्नाम विषमत्वं यदा स्थितम् ॥ २५ ॥
न तदुत्पद्यते ज्ञानं आदिमध्यान्तवर्ज्जितम् ।
नाधिष्ठानं प्रकुर्वन्ति सर्वदा सर्ववज्रिणः ॥ २६ ॥
सर्वदेवादयश्चापि न तं रक्षन्ति विद्विषः ।
तस्मादुपायविद्योगी सर्वसत्त्वैकबान्धवः ॥ २७ ॥
अविसंवा[द]कं चित्तं समुत्पाद्य ततो दृढम् ।
एतेनानेन सम्बुद्धाः तुष्टाः सर्वज्ञतात्मकाः ॥ २८ ॥
अधिष्ठानं प्रकुर्वन्ति महाबलपराक्रमाः ।
मारविघ्नापदश्चापि नावतारगवेषकाः ॥ २९ ॥
वज्रपाण्यादयो हृष्टा रक्षां कुर्वन्ति नित्यशः ।
सर्वपापविशुद्धिं च लभतेऽसौ नरोत्तमः ॥ ३० ॥

सर्वपुण्योदयश्चापि सम्यक्ज्ञानोदयं भवेत्[1] ।
अन्यथा नहि तत्त्वानां उ[द]यं सर्वथा भवेत् ॥ ३१ ॥
तस्मादादौ विधानज्ञो य[द्]ज्ञानं प्राप्तुमिच्छति ।
जन्मनीहैव सिद्ध्यर्थं [नि]रुपद्रवतां प्रति ॥ ३२ ॥
सर्वविघ्नविनाशार्थं आयुरारोग्यवर्द्धनम् ।
करणीयमतोऽवश्यं योगिना फलकाङ्क्षिणा ॥ ३३ ॥
नानातन्त्रेषु निर्दिष्टं कृपया बुद्धवज्रिणा ।
एष मार्गस्थितो योगी शुक्लपक्षे यथा शशी ।
वृद्धिक्रमं समायाति क्षयं न तु कदाचन ॥ ३४ ॥
हीनवीर्य्यो यदा कश्चित् बुद्धत्वं प्राप्नुयान्नहि ।
चक्रवर्त्तिसुखं राज्यं सर्वजन्मसु कारयेत् ॥ ३५ ॥
यत्पुण्यं सर्वबुद्धानां सर्वदिक्कालभाविनाम् ।
तत्तस्य रोमकूपाग्रे प्रवदन्ति जिनोत्तमाः ॥ ३६ ॥

ज्ञानसिद्धौ पुण्यज्ञानसम्भारप्राप्त्युपायोऽष्टमः ॥

---

[1] B उभयं ।

नवमः परिच्छेदः ।

कथं देशनया पापं[1] क्षयं गच्छेत् सुदारुणम् ।
अनुमोदनया पुण्यं कथं सम्भुज्यते तथा ॥ १ ॥
प्राणान्तपातकादीनि कर्त्तव्यं क्वचिदब्रवीत् ।
क्वचिन्नेति च तन्त्रेषु कथं तन्न विरुध्यते ॥ २ ॥
पञ्चामृतादिकं सर्वं अभक्ष्यं गम्यते तथा ।
अप्रियादीन्यनेकानि कथं तैस्तु शुभोदयः ॥ ३ ॥
[2]यथाक्रमं ब्रवीम्येषां तन्त्रे तन्त्रे निदर्शितम् ।
मन्दधीजनबोधार्थं सर्वबुद्धैः [सर्वज्ञिभिः[3]] ॥ ४ ॥
यत्कर्म्म क्रियते किञ्चित् कायवाङ्मनसैः क्रिया ।
चतुर्थी विद्यते नान्यस्तेषामेवं विचार्य्यते ॥ ५ ॥
[4]चित्तेन न विना कायः किञ्चित् कर्त्तुं भवेत् क्षमः ।
वचनं च विना तेन भवेत् नैव कदाचन ॥ ६ ॥
काये वाक्कर्म्मणी तस्माद्भवतां मानसेऽद्वयम् ।
चित्तेनैव जगत् सर्वं क्रियते यत् शुभाशुभम् ॥ ७ ॥
[5]हितार्थं यद्भवेत्कर्म्म सर्वं सच्चरितं भवेत् ।
विपर्य्ययादपुण्यं तत् प्रवदन्ति जिनोत्तमाः ॥ ८ ॥

---

[1] HB ॰पापार्थे ।

[2] B repeats प्राणान्त॰ etc , instead of this line

[3] MSS सर्वादिभि ।

[4] This and the two following lines are repeated in all MSS.

[5] H omits these three lines.

चित्तेनैव तु तत्सर्वं क्रियते यत् शुभाशुभम्।
चित्तेनैव भवेन्नाश इत्युवाच जगद्गुरुः ॥ ९ ॥

सत्त्वापकारनिष्पन्नं यत्पापं परिकीर्त्तितम्।
हितचित्तं समुत्पाद्य संभ्रष्टः प्रतिदेशयेत् ॥ १० ॥

उत्साहेन कृतं पूर्वं अपकारसमन्वितम्।
प्रतिप[1]क्षात् भवेन्नाशो यस्मात् तेनैव तत्कृतम् ॥ ११ ॥

घटमुत्पाद्य यः कश्चित् भिनत्त्येव तु तत् स्वयम्।
तथा पापं समुत्पन्नं नाशयेत् आत्मना स तु ॥ १२ ॥

देशयिष्याम्यहं पश्चा[2]दिति मूढः करोति चेत्।
न चास्य देशना युक्ता न पापं तस्य नश्यति ॥ १३ ॥

तथा पुण्यविनाशश्च तद्वदेव भवत्यपि।
कृते पुण्येऽपि छि[द्र]त्वाद् भवेन्नाशं न संशयः ॥ १४ ॥

ददतश्च[3] यदा चित्ते दातुमिच्छा न वर्त्तते।
दत्तेऽपि च न तत्पुण्यं प्रभविष्यति कस्यचित् ॥ १५ ॥

सर्वेषामधिकं स्थानं यत्र सर्वं विनश्यति।
कल्पकोटिसहस्रैश्च समुपात्तं शुभं महत् ॥ १६ ॥

उत्पन्नबोधिचित्तस्य पुण्यसम्भारसञ्चयः।
कल्पकोटिशतोपात्तः क्षणादेव विनश्यति ॥ १७ ॥

तादृशेऽप्रतिघे नान्यद् द्वितो[यम]नुजेऽप्रिये।
ततोऽपि रक्ष्यमत्यर्थं एवमुक्तं तथागतैः ॥ १८ ॥

तस्मिन् स्वल्पोपकारेण पुण्यराशिर्महान् भवेत्।
सर्वेषां सर्वसौख्यानां आकरत्वाद्गुणोदधौ ॥ १९ ॥

---

[1] H ०भ०। [2] H स्या०। [3] B ०श्च च

केचिन्मूढतरा बाला युक्त्यागम[म]पश्यकाः ।
कल्पे[1] नैव भवेत् पापं इत्या[हुः स्वा][2] त्मनाशकाः ॥ २० ॥
कल्पनारहितो योगी यदि पापैर्न लिप्यते ।
द्वेषाद्युत्पादहेतौ तु विकारित्वं न युज्यते ॥ २१ ॥
विहाय लौकिकीं वृत्तिमन्यथा तु भवेन्न किम् ।
शिरसा गमनं युक्तं तथा पाषाणभक्षणम् ॥ २२ ॥
शीतवातपिपासादिबाधा तस्य न युज्यते ।
आक्रोशाद्यपकारैश्च न खेदमुपसंहरेत् ॥ २३ ॥
स्वकीयं यदि कर्त्तव्यं लोभाद्याकष्टदुःस्थजम् ।
निर्विकल्पं प्रकल्प्येत न तथान्यच्च तद्भवेत् ॥ २४ ॥
अनुत्पादक्षयं नैव पापानां कर्म्मणामिह ।
क्रोधाहङ्कारयोगाच्च न पापं परिशुध्यते ॥ २५ ॥
देवतैव च तत्[3] सर्वं करोतीति प्रकल्प्यते ।
उत्पादात् पूर्वमेवासौ कारयेत् न[4] कथं भृशम् ॥ २६ ॥
देवतैव करोतीति मिथ्येयं परिकल्पना ।
यस्मात् लोभाभिभूतानां क्रियेयं[5] कर्त्तुमिच्छताम् ॥ २७ ॥
अनुमोदादिसर्वाणि चिन्तायत्ता[6] नि सर्वतः ।
पुण्यसंभारयुक्तानि ज्ञातव्यानीह[7] धीधनैः ॥ २८ ॥
कायवाक्सहितं हीनं तत्पुण्यं सम[म]स्तु ते ।
एकान्त[8] तीव्रचित्तस्य यत्पुण्यं बुद्धवर्णितम् ॥ २९ ॥

---

[1] HB ०ल्प० ।
[2] MSS ०ङ्करा० ।
[3] MSS चेत्तत् ।
[4] H कारयन ।
[5] H ०यते ।
[6] HN ०न्तयेत्ता० ।
[7] H ०व्यं नेह ।
[8] B एकस्य ।

प्राणिहिंसादि यत् कर्म लोभाद्याविष्टचेतसः ।
कुशलं न भवेत् सर्वं पुण्यं तु करुणोत्थितम् ॥ ३० ॥
यत् कर्म परहितार्थं क्रियते तु कृपात्मकैः ।
तत् सर्वं पुण्यमित्याहुर्जगदाशाप्रपूरकैः[1] ॥ ३१ ॥
निषेध्यमप्यनुज्ञातं कृपया दृढचेतसाम् ।
न तु स्वार्थाभिभूतानां करुणाहीनदेहिनाम् ॥ ३२ ॥
कृते पुण्येऽप्यनर्थाय कस्यचिद्द्विष्यतो जनम् ।
पापमेव भवेत् तस्य प्रवदन्ति जिनोत्तमाः ॥ ३३ ॥

उक्तं च—

कल्पान्ताद्बोधिसत्त्वानां शुभं वा यदि वाऽशुभम् ।
सर्वं[2] कल्याणता[3]मेति तेषां वश्यं यतो मनः ॥ ३४ ॥

इति ज्ञानसिद्धौ पापपुण्योत्पादविनाशपरिज्ञाननिर्देशो नवमः ॥

---

[1] MSS कः । [2] HB ०र्वं० । [3] HB ०णा० ।

दशमः परिच्छेदः ।

पञ्चामृतमविघ्नार्थं चित्तसंसाधनापरैः[1] ।
अ[2]जादिमांसमप्येवं योगिनां विहि[3]तं जिनैः ॥ १ ॥
सर्वेऽपि प्राणिनः[4] सर्वं भक्षन्तोऽपि न बुद्धकाः ।
न प्रजानन्ति ते मूढाश्चिन्ता[5]विगतबुद्धयः ॥ २ ॥
सर्वसम्पूर्णभूतत्वात् कायस्तावत् शुचिर्न हि ।
तत्सा[6]वभक्षकः कश्चित् सर्वं भुक्तं न तेन किम् ॥ ३ ॥
क्षीरादिकं तथा सर्वं सर्वेषामेव [दे]हिनाम् ।
भक्ष्याभक्ष्यप्रसिद्धानां शुचित्वं नैव सिध्यति ॥ ४ ॥
भक्तवस्तूनि सर्वाणि अशुचीनि प्रबुध्यते ।
यस्माज्जलेन संभूतिः तेषामिह प्रदृश्यते ॥ ५ ॥
वृष्टि[7]र्जलसमूहेन सर्वं प्रक्षाल्य कुत्सितम् ।
सर्वसस्यानि निष्पाद्य समुद्रादीन् विशेत् ततः ॥ ६ ॥
तज्जैरशुचिभिर्युक्तै[8]र्नागैरुत्थापितं जलम् ।
पुनर्वृष्टैः तथा सर्वसस्यं सम्पादयेज्जलम् ॥ ७ ॥
पुष्करिण्यादिके तद्वत् सर्वेषां सर्व[क्षा][9]लनम् ।
शुच्यशुच्यादिकं तस्मात् सर्वं नैवात्र विद्यते ॥ ८ ॥

---

[1] MSS ०रः ।
[2] H ०रा० ।
[3] MSS ०दि० ।
[4] H सर्वप्रियाणि ।
[5] B ०त्ता० ।
[6] MSS ०प्सा० ।
[7] B एष्ठे, H वृद्धे० ।
[8] B क्तं ।
[9] MSS ०खा० ।

शुचित्वं अस्ति चेत् किञ्चित् अशुचित्वं भविष्यति।
शुच्यभावादशुचित्वं सर्वथा नोपलभ्यते ॥ ९ ॥
आपेक्षिकत्वमन्योन्यपारापारकवद्यथा।
लौकिकी कल्पनैवैषा शुच्यशुच्यादिकल्पना ॥ १० ॥

ज्ञानसिद्धौ शुच्यशुच्यकल्पनाविविक्तो नाम दशमः ॥

एकादशः परिच्छेदः ।

अगम्यागमनस्यापि विचारः क्रियतेऽधुना ।
योगिनां समनुज्ञातं अविरुद्धं यथा तु तत् ॥ १ ॥
सर्वेषां देहिनामेव अस्त्येवोत्पादनाशनम् ।
तच्च कर्मवशादेव सर्वदा[1] चिभवे [भवे]त् ॥ २ ॥
माता पिता च पुत्रः स्यात् पुत्रो माता पिता भवेत् ।
चेटी[2] भार्य्यापि तौ स्यातां भार्य्या माता भवत्यपि ॥ ३ ॥
एवमादीनि रूपाणि अ[3]नेकानि सुविस्तरैः ।
भवेऽ[4]नादौ भवन्तीति वज्रसत्त्वेन देशितम् ॥ ४ ॥
एवं स्थिते तु संसारे दीर्घकालप्रवर्त्तिते ।
माता पिता न [भू]तो हि कश्चित् सत्त्वो न विद्यते ॥ ५ ॥
दुहित्राद्याः तथा सर्वाः प्राग्भूताः सन्ति पङ्क्तौ ।
तस्माच्च महती कार्य्या कृपेत्युक्ता जिनोत्तमैः ॥ ६ ॥
अत एव तु ते नाद्याः वज्रसत्त्वादयो वराः ।
दुहित्रादिरनुज्ञा[तो] योगिनां चित्तसाधने ॥ ७ ॥
कल्पनाजलपूर्णस्य संसारस्य महोदधेः ।
वज्रयानं समारुह्य को वा पारं गमिष्यति ॥ ८ ॥
मिथ्याज्ञानानि सर्वाणि युक्त्यागमसमायुतैः ।
निषिद्धानि क्रमात् तानि सर्वदोषाकराणि हि ॥ ९ ॥

ज्ञानसिद्धौ गम्यागम्यरहितो नाम एकादशः ॥

---

[1] H omits.
[2] H ०ति ।
[3] BH ०च०, N ०ए० ।
[4] HN भावत्व० ।

द्वादशः परिच्छेदः।

वज्रज्ञानप्रबोधार्थं युक्तिरप्युच्यतेऽधुना।
योगतन्त्रोक्तदृष्टान्तैर्हितायोत्तमयोगिनाम्॥ १॥
रूपकायादयो भावास्तत्त्वरूपं यथा न ते।
तद्वारणं कृतं पूर्वं अरूपत्वं ततः स्थितम्॥ २॥
सर्वदोषप्रसङ्गित्वाद् भावस्तत्त्वं भवेत् नहि।
अभावोऽपि न तत् तत्त्वं सर्वदुःखाकरं परम्॥ ३॥
भावाभावौ न तौ तत्त्वं भवेत् ताभ्यां विवर्जितम्।
न देशस्थमतो युक्तं सर्वज्ञो न भवेत् तदा॥ ४॥
व्यापित्वं वज्रकायत्वं अविकारित्वं एव च।
सर्वज्ञत्वमतः सिद्धं सम्यग्ज्ञानस्य युक्तितः॥ ५॥
रूपिणो नहि व्यापित्वं वज्रकायमतो नहि।
अविकार्य्यं न तस्यास्ति न सर्वज्ञो भविष्यति॥ ६॥
क्रमात् जानाति यः कश्चित् सर्वं नासौ प्रबुध्यते।
ज्ञेयानामप्रमाणत्वान्नासौ सर्वज्ञ दृश्यते॥ ७॥
कल्पकोटिसहस्रेण नासौ ज्ञातुं भवेत् क्षमः।
एकस्मिन्नेव दिग्भागे यत् ज्ञेयं परिकीर्त्तितम्॥ ८॥
उत्पद्य चेत् भवेन्नाशः तस्मादुत्पाद्यते नहि।
सुस्थितं चैव ज्ञानं तत् भ्रममात्रविनाशनम्॥ ९॥
गतागतं भवेद्यस्य [सुस्थितत्वं] न विद्यते।
चलत्वादेकदेशस्थान्नाशस्तस्य प्रयुज्यते॥ १०॥

[1] B ०धि०।

[2] N प्रकी०।

अवर्ण्यो यो भवेद्धर्मः कस्तं नाशयितुं क्षमः ।
शस्त्रोदकविषाग्नीनां वृद्धो जातो भवेत् न तु ॥ ११ ॥
[1]सर्वाकारप्रतिष्ठात्मा निश्चलो गगनोपमः ।
असंक्लिष्टोऽविकारश्च सर्वथा सर्वकालिकः ॥ १२ ॥
असार्वकालिको यस्तु न सर्वज्ञो भवेत् स तु[2] ।
तस्मात् सर्वप्रकालं तु भवितव्यं इति स्मृतम् ॥ १३ ॥
स्थितमेवं महाज्ञानं सर्वेषामेव देहिनाम् ।
न प्रजानन्ति मूढास्ते बाला मोहपटावृताः ॥ १४ ॥
लोष्टश्च धावति क्षिप्तो नासौ प्रक्षेपकस्तथा ।
एवं चित्तेन यद्भाव्यं तद्भावति[3] न चित्त[कम्[4]] ॥ १५ ॥
चित्तेन भाव्यते यत्तत् तदेव तु निरीक्ष्यते ।
इदं तत् कीदृशं चित्तमिति चिन्ता न व[5]र्त्तते ॥ १६ ॥

ज्ञानसिद्धौ तत्त्वस्थापनं नाम द्वादशः ॥

---

[1] H omits three lines.
[2] N सदा ।
[3] H भावयन्ति ।
[4] MSS ०तां ।
[5] HB प्रव० ।

त्रयोदशः परिच्छेदः ।

एष मूढतरो लोको मोक्षार्थमात्मनिश्चये ।
प्रपातेऽपि क्षिपत्येव पर्जन्येन प्रचोदितः ॥ १ ॥

ईदृशी दृश्यते चेष्टा बहूनामपि देहिनाम् ।
सन्त्यज्य सुगतौ [यानमन्यत् मार्गं समाश्रयेत्][1] ॥ २ ॥

तद्विधो[2] मनुजः कश्चित् मार्गमन्यत् प्रदर्शयेत् ।
पृच्छकोऽपि न तं पृच्छेत् [येन तत्त्वं][3] प्रबुध्यते ॥ ३ ॥

यदि मोहवशात् मार्गं दर्शयन्त[4]मपश्यकम् ।
न शिवं लभ्यते गन्तुस्तन्मार्गेणैव यायिनः ॥ ४ ॥

स्वयमपश्यको मार्गं कथमन्यं नयेद्भृशम् ।
द्वावेव[5] यदि गच्छेतां तयोर्दुःखं न संशयः ॥ ५ ॥

अटव्यां संप्रविष्टस्य जात्यन्धस्य यथा क्रिया ।
द्वितीयं तादृशं कश्चित् कथं ग्रामं प्रवेशयेत् ॥ ६ ॥

एवं जात्यन्धभूतास्ते सम्यग् ज्ञानमपश्यकाः ।
अशक्तास्तत्पदं प्राप्तुं कथमन्यं तु प्रापयेत् ॥ ७ ॥

तस्मात् परीक्ष्य कर्त्तव्यं गुरूणां पर्य्युपासनम् ।
शिष्यैर्भक्तिसमायुक्तैः प्रवदन्ति जिनोत्तमाः ॥ ८ ॥

रत्नत्रयेषु बुद्धात्मा कृपावान्[6] सर्वजन्तुषु ।
त्यागादिसंयतो धीरः सर्वपुण्यमहोदयः ॥ ९ ॥

---

[1] MSS मार्गमाश्रयेत् only.
[2] B नह्यन्यो ।
[3] MSS यद्यत्तत्त्वं ।
[4] B ०न्तु० ।
[5] MSS द्वावं द्वौ (?) ।
[6] MSS ०दा० ।

बोधिचित्तसमुत्पन्नः प्रसन्नो गुणवान् सुधीः ।
अक्रोधनो महोत्साही धर्म्मगम्भीरनिश्चयः ॥ १० ॥
सयुक्तिकं धर्म्मदानं निरा[भा]सं सदा मतम् ।
अल्पेच्छता सदा तस्य सम्भारद्वयसम्भृतः ॥ ११ ॥
गुरुरेष समाख्यातः सर्व्वबुद्धैः सवज्रिभिः ।
स एव सर्वसत्त्वानां शासको लोकनायकः ॥ १२ ॥
अन्ये च गुरवः ख्याता मिथ्याज्ञानाभिमानिनः ।
लोभाद्यर्थं प्रकुर्वन्ति धर्म्म[स्य] देशनां पराम्[1] ॥ १३ ॥
पापमित्राश्च ते बालाः सत्त्वनाशे प्रतिष्ठिताः ।
मारपाक्षिकगोत्रास्तेऽपरात्मानो विनाशकाः ॥ १४ ॥
वर्जनीया[श्च ते] सत्त्वा न तेषां पर्य्युपासनम् ।
न तेषां प्रतिघं कुर्य्यात् न ते [पूज्य]तरा भवेत् ॥ १५ ॥
श्रावकैः सह संवासो [यथा][2] नेष्टं तथागतैः ।
तथैवैवंविधैः सार्द्धं न संवासो विशिष्यते ॥ १६ ॥
पूर्वोक्तलक्षणैः तस्मात् आचार्य्यो हि विधीयते ।
शिष्यस्य लक्षणं चैव कथ्यते स[3] यथा भवेत् ॥ १७ ॥

ज्ञानसिद्धौ गुरुलक्षणनिर्द्देशः त्रयोदशः ॥

---

[1] B धर्मदेशनां वर ।
[2] MSS यत्था० ।
[3] MSS ०तैव ।

चतुर्दशः परिच्छेदः ।

नौकारूढो यथा कश्चित् कर्णधारः सुशिक्षितः ।
पारं महोदधेर्याति नान्यथा पारगो भवेत् ॥ १ ॥
तद्वद् गुरौ चिरत्ने च बोधिचित्ते च[1] भक्तिमान् ।
करुणा च तथा लोके नौरियं संप्रकीर्त्तिता ॥ २ ॥
गुरुः कर्णधरो विद्वान् नौका धर्म्मः प्रकाशितः ।
संसारपारगन्तॄणां वज्रसत्त्वेन देशितम् ॥ ३ ॥
कर्णधारं विना नौका पारं प्राप्तुं क्षमा नहि ।
गुणैः सर्वैः[2] प्रपूर्णोपि ना[3]गुरुर्भवपारगः ॥ ४ ॥
तस्मादेवास्य चैवेदं कार्यं सर्वं दृढव्रतैः ।
सदा पूजारतो योगी बाह्यैराध्यात्मिकैस्तथा ॥ ५ ॥
वन्दनादिक्रियाः सर्वाः प्रकुर्य्यात् सर्वकालिकाः ।
श्रद्धा[4]प्रज्ञासमायुक्तः कृपार्द्रः सर्वजन्तुषु ॥ ६ ॥
अक्रोधनोऽविसंवादी त्यागादिगुण[भूषितः][5] ।
सुवीर्य्यश्च महोत्साही गुरोराज्ञां सदा करः ॥ ७ ॥
आज्ञप्तश्च स्वयं बुद्ध्वा परि[चर्या][6]दिकं [चरे][7]त् ।
यथाशक्ति यथालाभं भोज्यभक्तादिकं तथा ॥ ८ ॥

---

[1] B न ।
[2] HN ०वै ।
[3] A न ।
[4] HB श्रद्ध० ।
[5] B ०वि[भू]षित, H ०विभूतय ।
[6] MSS ०स्करा० ।
[7] MSS ०वदे० ।

तिरस्कारे कृतेऽप्येवं स्वयमेव न दुर्मनाः ।
शिष्यः सर्वगुणोपेतो युक्त्यागमपरीक्षकः ॥ ९ ॥
अपरीक्षकजातीयः पृच्छेत् [1]परहितञ्च यः ।
शिष्यो न[2] भवितुं शक्तो[3] बुद्धैरेवं प्रदर्श्यते ॥ १० ॥
मृत्पिण्डो हि यथा बालैः क्षिप्यते यत्र तत्र वै ।
तद्वत् परवशः कश्चित् [स शिष्यत्वस्य][4] भाजनम् ॥ ११ ॥

ज्ञानसिद्धौ शिष्यलक्षणपरिच्छेदः चतुर्दशः ॥

---

[1] MSS पारह्हितस्य य (?) ।
HB ०मया ।

[2] H ष्यिेण ।

[4] MSS सर्वमस्य न ।

पञ्चदशः परिच्छेदः।

सम्यक्तत्त्वं यथाभूतं पूर्व्वमुक्तं सयुक्तिकम्।
सर्वतन्त्रे स्थितं तत्त्वं तेभ्यः किञ्चिन्निगद्यते॥ १॥
चोरशब्दो [यथा] लोके भक्ष्यार्थं प्रतिपादयेत्।
केषाञ्चित् चोरमेवाहुः तन्त्रेऽप्येवं पदास्तथा॥ २॥
तै[1]रेवाक्षरनिर्द्दे[2]शैर्म्मृदुमध्याधिमात्रकैः।
धर्म्मश्चो[3]च्यते बुद्धैः सत्त्वानुग्रहकारकैः॥ ३॥
केवलं तत्त्वमेवाहुः कश्चित् [मध्येन्द्रिय][4]स्तथा।
कश्चित् स्वद्विन्द्रियः कर्म केवलं वक्ति नान्यथा॥ ४॥

श्रीसमाजोत्तरे देशितम्—

अनादिनिधनं शान्तं भावाभावाक्षयं विभुम्।
शून्यताकरुणाभिन्नं बोधिचित्तमिति स्मृतम्॥ ५॥

अनादिनिधनमिति उत्पादविनाशाभावम्। अनेन [5]व्यापित्वं अवि[6]कारित्वं सार्वकालिकत्वं च कथितम्। देशस्थरूपि[7]विकारिकालान्तरिकानां विनाशित्वात्। अरू-[8]पित्वेऽपि देशस्थो यदि स्यात् विनाश्येव भवति। यथा कस्तूरीकादीनां सुगन्धं अरूप्यपि देशस्थत्वात् कस्तूरी-

---

[1] H तेनै०।
[2] MSS ०दि०।
[3] MSS ०वो०।
[4] MSS मन्द्रद्वय० (?)।
[5] All the MSS repeat from व्यापित्व...परिवारयामीति।
[6] H ०पि०।
[7] B ०पे, N ०पी।
HB ०प्य०।

कादीनां तद्वासितंद्रव्यस्य वाऽभावे विनाशि स्यादिकारि च। शान्तमिति सर्वक्लेशानामागन्तुकत्वात् प्रकृतिशान्तम्। पूर्वोक्तगुणयुक्तत्वा[त्तदेव] भावाभावाक्षयम्। विभुं प्रभुं स्वामी सर्वेषां लौकिकलोकोत्तरार्थसम्पादकत्वात्। शून्यता-करुणाभिन्नं इति। सर्वधर्मनिःस्वभावतया सर्वतथागत-ज्ञानपरिज्ञानं[1] शून्यता [तया] करुणया वा अभिन्नमेकी-भूतं[2] यत् चित्तम्। करुणा नाम सर्वसत्त्वान् अस्मिन्नेव ज्ञानराजे प्रतिष्ठापयिष्यामि, सर्वसुखोपधानैश्च परि-वारयिष्यामीति सम्यगाशयः। एतदुक्तं भवति—

सर्वधर्मस्वभावज्ञो योगी सर्वतथागतैः।

सह अन्योन्यव्यापकभावेन सदा स्थितो बुद्धत्वकारः सर्वसत्त्वेषु महाकरुणाप्रमाणानुगतं बोधिचित्तं वज्र इत्यर्थः।

अनेन भावनाप्येव कर्त्तव्येति निदर्शितम्। बोधि-चित्तमिति स्मृतमिति अशेषयोगतन्त्रेष्वेवं अभिप्रापयति। आदिकर्म्मिकादीनां तु बोधिचित्तं सर्वसत्त्वान[3]नुत्तरायां सम्यक्सम्बोधौ प्रतिष्ठापया[4]मीति चित्तमात्रम्। पुनस्तत्रैव देशितम्—

समाजं मीलनं प्रोक्तं सर्वबुद्धाभिधानकम् ॥ ६ ॥

अरूपिणाम् अनादिनिधनत्वासम्भवाद्धर्मकाया एव बुद्धाः। तेषां मीलनं सर्वतथागतज्ञानवज्रधरत्वमेव निर्दिष्टमन्यथा रूपकायेन यदि मीलनं स्यात् परमाणु-प्रमाणादि[5] सर्वतथागतानां मीलने आकाशमपि

---

[1] H omits ॰परिज्ञान। [2] HB ॰भूतेन।
[3] H ॰त्त्वानु॰। [4] B ॰पयिष्या॰।
[5] HN ॰पि।

प्रपूर्य्याधिकतरा[1] भवेयुः। सर्वशब्दस्य[2] निरवशेषत्वात् चित्तानामल्पानां मीलनं युज्यते। पुनस्तत्रैव तथा उत्पन्नक्रमाणां अक्षतं सम्यग् ज्ञानम्। एवं च तत्रैव प्रकाशितम्—

ध्यायन्ति येऽमुं सुविशुद्धमनादिभावमित्यादि।

प्रथमपटलेऽपि—

अथायं सर्वाकाशधातुः सर्वतथागतवज्रमयसंस्थितोऽभूत्।

पुनः—

अनुत्पन्नेषु धर्म्मेषु न भावो न च भावना।
आकाशवद्‌योगेन इति भावः प्रगीयते ॥ ७ ॥

पुनः—

प्रकृतिप्रभास्वरा धर्म्मा आदिशुद्धा नभःसमाः।
बोधिनाऽभिसम[यमिदं] बोधिनयं दृढम् ॥ ८ ॥

नवमे पटले—

